NEW PRABHAT

५९६

THE SIX PHILOSOPHICAL BUDDHIST TRACTS

२११.५९६

Published by.

The Asiatic Society of Bengal

NEW PARBHAT STATIONERY MART
Book Manufacturers & Paper Merchants.
60, ABDUL REHMAN STREET,
BOMBAY 3.

4031/2

|| नमः श्री अन्तरिक्षपार्श्वनाथाय ||

२ना. ५१९

# THE SIX PHILOSOPHICAL BUDDHIST TRACTS

रत्नकीर्तिरचिता

(१) अपोहसिद्धिः, (२) क्षणभङ्गसिद्धिः, अन्वयेन, (३) क्षणभङ्गसिद्धिः, व्यतिरेक

पण्डिताशोकप्रणीतम्

(१) अवयविनिराकरणम्, (२) सामान्यदूषणदिक्प्रसारिता

रत्नाकरशान्तिरचितम्

(१) अन्तर्व्याप्तिसमर्थनम्

PUBLISHED

By

The Asiatic Society of Bengal.

१३४ ।११८

| | पृष्ठ |
|---|---|
| अपोहसिद्धिः | [1 - 19] |
| क्षणभङ्गसिद्धिः (अन्वयेन) | [20 - 53] |
| " (व्यतिरेकेण) | [54 - 77] |

शिरसाला
E. K.





# [1] अपोहसिद्धिः

॥ नमः श्रीलोकनाथाय ॥

अपोहः शब्दार्थो निरुच्यते।

ननु कोऽयमपोहो नाम? (१) किमिदमन्यस्मादपोह्यते; अस्माद्वा अन्यदपोह्यते; अस्मिन् वाऽन्यदपोह्यत इति व्युत्पत्त्या विजातीयव्यावृत्तं बाह्यमेव विवक्षितम्;
(२) बुद्ध्याकारो वा; (३) यदि वा अपोहनमपोह इत्यन्यव्यावृत्तिमात्रम् इति त्रयः पक्षाः। न तावदादिमौ पक्षौ, अपोहनाम्ना विधेरेव विवक्षितत्वात्। अन्तिमोऽपि असङ्गतः प्रतीतिबाधितत्वात्; तथा हि पर्वतोद्देशे वह्निरस्तीति शाब्दी प्रतीतिर्विधिरूपमेवोल्लिखन्ती लक्ष्यते; नाऽनग्निर्न भवतीति निवृत्तिमात्रमामुखयन्ती। यच्च प्रत्यक्षबाधितं न तत्र साधनान्तरावकाश इत्यतिप्रसिद्धम्। अथ यद्यपि निवृत्तिमहं प्रत्येमीति न विकल्पः। तथापि निवृत्तपदार्थोल्लेख एव निवृत्त्युल्लेखः। न ह्यन-
[२] न्तर्भावितविशेषणप्रतीतिर्विशिष्टप्रतीतिः ॥ [२] ततो

यथा सामान्यमहं प्रत्येमीति विकल्पाभावेऽपि साधार
णाकारपरिस्फुरणात् विकल्पबुद्धिः सामान्यबुद्धिः परेषां
तथा ^फ^ निवृत्तप्रत्ययाक्षिप्ता निवृत्तिबुद्धिरपोहप्रतीतिव्यव
हारमातनोतीति चेत्। ननु साधारणाकारपरिस्फु-
रणे विधिरूपतया यदि सामान्यबोधव्यवस्था; तत्
किमायातमस्फुरदभावाकारे चेतसि निवृत्तिप्रतीति-
व्यवस्थायाः। ततो निवृत्तिमहं प्रत्येमीत्येवमाकारा-
भावेऽपि निवृत्त्याकारस्फुरणं यदि स्यात्, को नाम
निवृत्तिप्रतीतिस्थितिमपलपेत्। अन्यथाऽसति प्रति-
भासे तत्प्रतीतिव्यवहृतिरिति गवाकारेऽपि चेतसि
तुरगबोध इत्यस्तु। अथ विशेषणतया अन्तर्भूता
निवृत्तिप्रतीतिरित्युक्तम्, तथापि यद्यगवापोढ
इतीदृशाकारो विकल्पस्तदा विशेषणतया तदनु-
प्रवेशो भवतु, किन्तु गौरिति प्रतीतिः। तदा च
सतोऽपि निवृत्तिलक्षणस्य विशेषणस्य तत्राऽ-
नुत्कलनात्, कथं तत्प्रतीतिव्यवस्था। अथैवं
मतिः। यद् विधिरूपं स्फुरितं तस्य परापोहोऽप्यस्ती-
ति तत्प्रतीतिरुच्यते। तथापि सम्बन्धमात्रमपोह-

फ निमित्तप्रत्यया॰ D

स्य, विधिरेव साक्षान्निर्भाति । अपि चैवमध्यक्ष-
[3] स्याऽप्यपोह[3]विषयत्वमनिवार्यम् । विशेषतो विकल्पा-
देकव्यावृत्तोल्लेखिनोऽखिलान्यव्यावृत्तमीक्षमाणस्य ।
तस्मात् विध्याकारावग्रहादध्यक्षवद् विकल्पस्याऽपि
विधिविषयत्वमेव । नाऽन्यापोहविषयत्वमिति कथ-
मपोहः शब्दार्थो घुष्यते ॥

अत्राऽभिधीयते — नाऽस्माभिरपोहशब्देन
विधिरेव केवलोऽभिप्रेतः । नाऽप्यन्यव्यावृत्तिमात्रम् ।
किन्तु अन्यापोहविशिष्टो विधिः शब्दानामर्थः । तत-
श्च न प्रत्येकपक्षोपनिपातिदोषावकाशः । यत्तु गोः
प्रतीतौ न तदात्मा परात्मेति सामर्थ्यादपोहः पश्चा-
न्निश्चीयत इति विधिवादिनां मतम्; अन्यापोह-
प्रतीतौ वा सामर्थ्यादन्यापोढोऽवधार्यते इति प्रतिषेध-
वादिनां मतम् । तदसुन्दरम्, प्राथमिकस्याऽपि
प्रतिपत्तिक्रमादर्शनात् । न हि विधिं प्रतिपद्य कश्चि-
दर्थापत्तितः पश्चादपोहमवगच्छति; अपोहं
वा प्रतिपद्य अन्यापोढम्; तस्माद् गोः प्रतिप-
त्तिरिति अन्यापोढप्रतिपत्तिरुच्यते । यद्यपि चाऽन्या-

पोढ शब्दानुल्लेख उक्तः तथापि नाऽप्रतिपत्तिरेव
विशेषणभूतस्याऽन्यापोहस्य; अगवापोढ एव गोशब्द
स्य निवेशितत्वात्। यथा नीलोत्पले निवेशितादिन्दीव-
[५] रशब्दान्नीलोत्पलप्रतीतौ तत्काल[५] एव नीलिमस्फुर
णमनिवार्यम्; तथा गोशब्दादप्यगवापोढे निवेशिता-
न् गोप्रतीतौ तुल्यकालमेव विशेषणत्वात् अगो(ऽ) (न्य)
पोहस्फुरणमनिवार्यम्। यथा प्रत्यक्षस्य प्रसज्यरूपा-
भावग्रहणमभावविकल्पोत्पादनशक्तिरेव। तथा विधि-
विकल्पानामपि तदनुरूपानुष्ठानदानशक्तिरेवाऽ-
भावग्रहणमभिधीयते। पर्युदासरूपाभावग्रहणं तु
नियतस्वरूपसम्वेदनमुभयोरविशिष्टम्; अन्यथा
यदि शब्दादर्थप्रतिपत्तिकाले कलितो न परापोहः;
कथमन्यपरिहारेण प्रवृत्तिः। ततो गां बधानेति
चोदितोऽश्वादीनपि बध्नीयात्। यदप्यवोचत्
वाचस्पतिः 'जातिमत्यो व्यक्तयः विकल्पानां श-
ब्दानां च गोचरः; तासां च तद्वतीनां रूपमतज्जाती-
यपरावृत्तमित्यर्थतस्तदवगतेर्न गां बधानेति
चोदितोऽश्वादीन् बध्नाति' तदप्यनेनैव निरस्त-

म। यतो जातिरधिकायाः प्रक्षेपेऽपि व्यक्तीनां रूप=
मतज्जातीयव्यावृत्तमेव चेत्, तदा तेनैव रूपेण शब्द-
विकल्पयोर्विषयीभवन्तीनां कथमतद्व्यावृत्तिपरिहारः।
अथ न विजातीयव्यावृत्तं व्यक्तिरूपम्, तथाप्र-
तीतम्, वा तदा जातिप्रसाद एष इति कथमर्थतो-
[5] ऽपि तदवगतिरित्युक्तप्रायम्। [5]

अथ जातिबलाद्वाऽन्यतो व्यावृत्तम्। भवतु
जातिबलात् स्वहेतुपरम्पराबलाद् वाऽन्यव्यावृत्तम्।
उभयथापि व्यावृत्तप्रतीतौ व्यावृत्तिप्रतीतिरस्त्येव।
न चाऽगोपोढे गोशब्दसङ्केतविधावन्योन्याश्रयदोषः।
सामान्ये तद्वति वा संकेतेऽपि तद्दोषावकाशात्।
न हि सामान्यं नाम सामान्यमात्रमभिप्रेतम् तुरगे-
ऽपि गोशब्दसंकेतप्रसंगात्। किन्तु गोत्वम्।
तावता च स एव दोषः। गवापरिज्ञाने गोत्वसामा-
न्यापरिज्ञानात्। गोत्वसामान्यापरिज्ञाने गोशब्दवाच्या-
परिज्ञानात्। तस्मात् एकपिण्डदर्शनपूर्वको यः सर्व-
व्यक्तिसाधारण इव बहिरध्यस्तो विकल्पबुद्ध्याकारः,
तत्राऽयं गौरिति संकेतकरणे नेतरेतराश्रयदोषः।

अभिमते च गोशब्दप्रवृत्तावगोशब्देन शेषस्याऽप्यभिधानमुचितम्। न चाऽन्यापोढान्यापोहयोर्विरोधो विशेष्यविशेषण[फु]क्षतिर्वा; परस्परव्यवच्छेदाभावात्, सामानाधिकरण्यसद्भावात्, भूतलघटाभाववत्। स्वाभावेन हि विरोधो न पराभावेनेत्याबालप्रसिद्धम्। एष पन्थाः स्रुघ्नमुपतिष्ठत इत्यत्राप्यपोहो गम्यत एव; अप्रकृतपथान्तरापेक्षया एष एव। [6] स्रुघ्नप्रत्यनीकानिष्टस्थानापेक्षया स्रुघ्नमेव। अरण्यमार्गवत् विच्छेदाभावादुपतिष्ठत एव। सार्थदूतादिव्यवच्छेदेन पन्था एवेति प्रतिपत्तेः व्यवच्छेदस्य सुलभत्वात्। तस्मादपोहधर्मणो विधिरूपस्य शब्दादवगतिः; पुण्डरीकशब्दादिव श्वेतिमविशिष्टस्य पद्मस्य। यद्येवं विधिरेव शब्दार्थो वक्तुमुचितः। कथमपोहो गीयत इति चेत्? उक्तमत्राऽपोहशब्देनान्यापोहविशिष्टो विधिरुच्यते; तत्र विधौ प्रतीयमाने विशेषणतया तुल्यकालमन्यापोहप्रतीतिरिति। नचैवं प्रत्यक्षस्याऽप्यपोहविषयत्वव्यवस्था कर्तुमुचिता; तस्य शब्दप्रत्ययस्येव वस्तुविषयत्वे विवादाभावात्। विधिशब्देन च

फु. ०णभावक्ष० B.।

~~यथाध्यवसायमतद्रूपपरावृत्तो बाह्योऽर्थोऽभिमतः; यथा-~~
प्रतिभासं बुद्ध्याकारश्च । तत्र बाह्योऽर्थोऽध्यवसायादेव
शब्दवाच्यो व्यवस्थाप्यते। न स्वलक्षणपरिस्फूर्त्या। प्रत्य-
क्षवद् देशकालावस्थानियत प्रव्यक्तस्वलक्षणास्फुर-
णात् । यच्छास्त्रम् ॥
"शब्देनाऽव्यापृताक्ष्य(स्य) बुद्धावप्रतिभासनात् ।
अर्थस्य दृष्टाविवेति,
इन्द्रियशब्दस्वभावोपायभेदात् एकस्यैव* प्रतिभास-
भेद इति चेत्? अत्राप्युक्तम् (= सां तस्य)
[7] जातो नामाश्रयोऽन्यान्यः चेतसान्तस्य वस्तुनः।
एकस्यैव कुतो रूपं भिन्नाकारावभासि तत् ॥
न हि स्पष्टास्पष्टे द्वे रूपे परस्परविरुद्धे एकस्य
वस्तुनः स्तः; यत एकेनेन्द्रियबुद्धौ प्रतिभासेतान्येन
विकल्पे; तथासति वस्तुन एव भेदप्राप्तेः; न हि
स्वरूपभेदादपरो वस्तुभेदः। न च प्रतिभासभेदादपरः
स्वरूपभेदः; अन्यथा त्रैलोक्यमेकमेव वस्तु स्यात्।
दूरासन्नदेशवर्तिनोः पुरुषयोः एकत्र शाखिनि स्पष्टा-
स्पष्टप्रतिभासभेदेऽपि न शाखिभेद इति चेत्?

* B adds अर्थस्य

न ब्रूमः प्रतिभासभेदो भिन्नवस्तुनियतः। किन्तु,
एकविषयत्वाभावनियत इति। ततो यत्रार्थ^क्रिया^भेदादिसचिवः
प्रतिभासभेदः तत्र वस्तुभेदः, घटवत्। अन्यत्र पुनर्नि-
यमेनैकाविषयतां परिहरतीत्येकप्रतिभासो भ्रान्तः।
एतेन यदाह वाचस्पतिः — न च शब्द-प्रत्यक्षयोर्वस्तु
गोचरत्वे [redacted] प्रत्ययाभेदः कारणभेदेन
पारोक्ष्यापारोक्ष्यभेदोपपत्तेरिति। तन्नोपयोगि। परो-
क्षप्रत्ययस्य वस्तुगोचरत्वासमर्थनात्। परोक्षताश्रय-
स्तु कारणभेद इन्द्रियगोचरग्रहणविरहेणैव कृतार्थः।
तन्न शाब्दे प्रत्यये स्वलक्षणं परिस्फुरति। किंच
स्वलक्षणात्मनि वस्तुनि वाच्ये सर्वात्मना प्रतिपत्तेः,
[8] विधि-निषेधयोरयोगः। तस्य हि सद्भावेऽस्तीति
व्यर्थम्, नास्तीत्यसमर्थम्; फअसद्भावे नास्तीति
व्यर्थमस्तीत्यसमर्थम्। अस्ति चास्त्यादिपदप्रयोगः।
तस्मात् शब्दप्रतिभासस्य बाह्यार्थभावाभावसाधा-
रण्यं न तद्विषयतां क्षमते।

यच्च वाचस्पतिना जातिमद्व्यक्तिवाच्यतां स्वनाचै-
व प्रस्तुत्यानन्तरमेव न च शब्दार्थस्य जातेर्भावाभाव-

फ B adds तु after असद्भावे।

साधारण्यं नोपपद्यते; सा हि स्वरूपतो नित्याऽपि देशकालविप्रकीर्णानेकव्यक्त्याश्रयतया भावाभावसाधारणी भवन्त्यस्तिनास्तिसम्बन्धयोग्या; वर्तमानव्यक्तिसम्बन्धिता हि जातेरस्तिता; अतीतानागतव्यक्तिसम्बन्धिता च नास्तितेति सन्दिग्धव्यतिरेकित्वादनैकान्तिकं भावाभावसाधारण्यमन्यथासिद्धं वेति विलपितं तावन्न प्रकृतक्षतिः। जातौ भरं न्यस्यता स्वलक्षणावाच्यत्वस्य स्वयं स्वीकारात्। किञ्च सर्वत्र पदार्थस्य स्वलक्षणस्वरूपेणैवास्तित्वादिकं चिन्त्यते। जातेस्तु वर्तमानादिव्यक्तिसम्बन्धोऽस्तित्वादिकमिति तु बालप्रतारणम्।

(न्यय?)

[9] एवं जातिमद्व्यक्तिवचनेऽपि दोषः; व्यक्तेश्चेत् प्रतीतिसिद्धिः; जातिरधिका प्रतीयताम्, मा वा, [9] न तु व्यक्तिप्रतीतिदोषाद् मुक्तिः।

एतेनैव यदुच्यते कौमारिलैः। सभागत्वादेव वस्तुनो न साधारण्यदोषः। वृक्षत्वं ह्यनिर्धारितभावाभावं शब्दादवगम्यते। तयोरन्यतरेण शब्दान्तरावगतेन सम्बध्यत इति। तदप्यसङ्गतम्; सामान्यस्य नित्यस्य प्रतिपत्तावनिर्धारितभावाभावत्वायोगात्। यच्चेदं न च प्रत्यक्षस्येव

विप्रकीर्ण॰ A। तावत्ता तावत् B. स्वलक्षणरूपेण॰ B.

शब्दानामर्थप्रत्यायनप्रकारो येन तद्दृष्ट इव अस्त्यादि
शब्दापेक्षा न स्यात्; विचित्रशक्तित्वात् प्रमाणा-
नामिति। तदप्यैन्द्रियकशाब्दप्रतिभासयोरेकस्वरूप-
ग्राहित्वे भिन्नावभासदूषणेन दूषितम्। विचित्रशक्ति
त्वं च प्रमाणानां साक्षात्काराध्यवसायाभ्यामपि चरि-
तार्थम्। ततो यदि प्रत्यक्षार्थप्रतिपादनं शाब्देन
तद्वदेवावभासः स्यात्। अभवंश्च न तद्विषयख्याप-
नं क्षमते। ननु वृक्षशब्देन वृक्षत्वांशे चोदिते सत्त्वा-
द्यंशनिश्चयनार्थमस्त्यादिपदप्रयोगः इति चेत्?
निरंशत्वेन प्रत्यक्षसमधिगतस्य स्वलक्षणस्य
कोऽवकाशः पदान्तरेण, धर्मान्तरविधिनिषेधयोः
प्रमाणान्तरेण वा। प्रत्यक्षेऽपि प्रमाणान्तरापेक्षा
दृष्टेति चेत्? भवतु तस्याऽनिश्चयात्मत्वात् अन-
भ्यस्तस्वरूपविषये; विकल्पस्तु स्वयं निश्चयात्मको
[10] यत्र ग्राही तत्र किमपरेण? [10] अस्ति च
शब्दलिङ्गान्तरापेक्षा ततो न वस्तुस्वरूपग्रहः[फ]। ननु
भिन्ना जात्यादयो धर्माः परस्परं धर्मिणश्चेति
जातिलक्षणैकधर्मद्वारेण प्रतीतेऽपि शाखिनि धर्मान्तर-

फ पञ्चम्यन्तमेतत्।

वत्तया न प्रतीतिरिति किं न भिन्नाभिधानाधी-
नो धर्मान्तरस्य नीलचलोच्चैस्तरत्वादेरवबोधः। तदे-
तदसंगतम्; अखण्डात्मनः स्वलक्षणस्य प्रत्यक्षे प्रति-
भासात्। दृश्यस्य धर्म-धर्मिभेदस्य प्रत्यक्षप्रतिक्षिप्त-
त्वात्। अन्यथा सर्वं सर्वत्र स्यादित्यतिप्रसङ्गः।
काल्पनिकभेदाश्रयस्तु धर्मधर्मिव्यवहारः इति प्रसा-
धितं शास्त्रे; भवतु वा पारमार्थिको धर्मधर्मिभेदः
तथापि अनयोः समवायादेर्दूषितत्वादुपकारलक्षणैव
प्रत्यासत्तिरेषितव्या। एवं च यथेन्द्रियप्रत्यासत्त्या प्रत्यक्षे-
ण धर्मिप्रतिपत्तौ सकलतद्धर्मप्रतिपत्तिः। तथा शब्द-
लिङ्गाभ्यामपि वाच्य-वाचकादिसम्बन्धप्रतिबद्धाभ्यां
धर्मिप्रतिपत्तौ निरवशेषतद्धर्मप्रतिपत्तिर्भवेत्; प्रत्यास-
त्तिमात्रस्याविशेषात्। यच्च वाचस्पतिः; न चैको-
पाधिना [फ]सत्त्वे विशिष्टे तस्मिन् गृहीते; उपाध्यन्त-
रविशिष्टतद्ग्रहः। स्वभावो हि द्रव्यस्य उपाधिभि-
[11] [२]र्विशिष्यते। न तूपाधयो [11] वा विशेष्यत्वं वा
तस्य स्वभावः' इति। तदपि प्लवत एव। न हि
णंमया/ अभेदादुपाध्यन्तरग्रहणं ~~त्वमा~~स्मज्जितम् ("ममा?त्वमा?")। भेदं पुरस्कृ-

फ सत्त्वेन B। २ विशेष्यते A। (1)
← seems to be better.

त्यैवोपकारकग्रहणे उपकार्यग्रहणप्रसञ्जनात्।
न चाग्निधूमयोः कार्यकारणभाव इव स्वभावत एव धर्म-धर्मिणोः प्रतिनियमकल्पनमुचितम्। तयोरपि प्रमाणासिद्धत्वात्। प्रमाणसिद्धे च स्वभावोपवर्णनमिति न्यायः।

यच्चात्र न्यायभूषणेन सूर्यादिग्रहणे तदुपकार्याशेषवस्तुराशिग्रहणप्रसञ्जनमुक्तम्; तदभिप्रायानवगाहनफलम्। तथा हि त्वन्मते धर्मधर्मिणोर्भेदः उपकारलक्षणैव च प्रत्यासत्तिः। तदुपकारकग्रहणे समानदेशस्यैव धर्मरूपस्यैव चोपकार्यस्य ग्रहणम् सञ्जितम्। तत् कथं सूर्योपकार्यस्य भिन्नदेशस्य द्रव्यान्तरस्य वा दृष्टव्यभिचारस्य ग्रहणप्रसंगः सङ्गतः। तस्मात् एकधर्मद्वारेणाऽपि वस्तुस्वरूपप्रतिपत्तौ सर्वात्मप्रतीतेः; क्व शब्दान्तरेण विधिनिषेधावकाशः। अस्ति च, तस्मान्न स्वलक्षणस्य शब्दविकल्पलिङ्गप्रतिभासित्वमिति स्थितम्॥

नापि सामान्यं शाब्दप्रत्ययप्रतिभासि, असत्त्वात्:

पारे गावश्चरन्तीति गवादिशब्दात् सास्नाशृङ्ग-
[१२] लाङ्गूलादयोऽक्षराकारपरिकरिताः सजातीयभेदापरामर्श-
नात् सम्पिण्डितप्रायाः प्रतिभासन्ते। न च तदेव सा-
मान्यम्।

"वर्णाकृत्यक्षराकारशून्यं गोत्वं हि कथ्यते।"

तदेव च सास्नाशृङ्गादिमात्रमखिलव्यक्तावत्यन्तवि-
लक्षणमपि स्वलक्षणेनैकीक्रियमाणं सामान्यमित्यु-
च्यते। तादृशस्य बाह्यस्याऽप्राप्तेर्भ्रान्तिरेवासौ केशप्रतिभा-
सवत्। तस्मात् वासनावशात् बुद्धेरेव तदात्मना
विवर्तोऽयमस्तु, असदेव वा फ तद्रूपं ख्यातु; व्यक्तय
एव वा क सजातीयभेदतिरस्कारेणाऽन्यथा भासन्तामनुभ-
वव्यवधानात्; स्मृतिप्रमोषो वाऽभिधीयताम्; सर्वथा
निर्विषयः खल्वयं सामान्यप्रत्ययः; क्व सामान्यवार्ता?
यत् पुनः सामान्याभावे सामान्यप्रत्ययस्याऽकस्मिक-
त्वमुक्तं तदयुक्तम्। यतः पूर्वपिण्ड⊕दण्डदर्शनस्मरण-
सहकारिणाऽतिरिच्यमाना विशेषप्रत्ययजनिका सामग्री
निर्विषयं सामान्यविकल्पमुत्पादयति। तदेवं न शाब्द-
प्रत्यये जातिः प्रतिभाति; नापि प्रत्यक्षे। न चानुमान-

फ असदेवातद्रूपं A। क A omits वा। ⊕ B omits दण्ड/ B seems correct.

~~तोऽपि सिद्धिः; अदृश्यत्वे प्रतिबद्धलिङ्गादर्शनात्।~~

नाऽपीन्द्रियवदस्याः सिद्धिः। ज्ञानकार्यतः कादाचित्क-

[13] स्यैव निमित्तान्तरस्य सिद्धेः। [13] यदापि पिण्डान्तरे

अन्तराले वा गोबुद्धेरभावं दर्शयेत्, तदा शाबले-

यादिसकलगोपिण्डानामेवाभावादभावो गोबुद्धेरुप-

पद्यमानः कथमर्थान्तरमाक्षिपेत्? गोत्वादेव गोपि-

ण्डः, अन्यथा तुरगोऽपि गोपिण्डः स्यात्। यद्येवं

गोपिण्डादेव गोत्वमन्यथा तुरगत्वमपि गोत्वं

स्यात्। तस्मात् कारणपरम्परात एव गोपिण्डो

गोत्वं तु भवतु मा वा। ननु सामान्यप्रत्य-

यजननसामर्थ्यं यद्येकस्मात् पिण्डादभिन्नम्;

तदा विजातीयव्यावृत्तं पिण्डान्तरमसमर्थम्।

अथ भिन्नं तदा तदेव सामान्यम्, नाम्नि परं

विवाद इति चेत्? अभिन्नैव सा शक्तिः प्रति

वस्तु; यथा त्वेकः शक्तस्वभावो भावः तथा अन्यो-

ऽपि भवन् कीदृशं दोषमावहति? यथा भवतो

जातिरेकाऽपि समानध्वनिप्रसवहेतुरन्यापि

स्वरूपेणैव जात्यन्तरनिरपेक्षा। तथास्माकं

व्यक्तिरपि जातिनिरपेक्षा स्वरूपेणैव भिन्नो
हेतुः। यत्तु त्रिलोचनः अश्वत्वगोत्वादीनां सामान्य-
विशेषाणां फ स्वाश्रये समवायः 'सामान्यम्, सामान्य-
मित्यभिधानप्रत्यययोर्निमित्तमिति। यद्येवं व्यक्तिष्वप्यय
[14] मेव तथाभिधानप्रत्ययहेतुरस्तु। किं सामान्यस्वीकार-
प्रमादेन।

न च समवायः सम्भवी॥

"इहेति बुद्धेः समवायसिद्धिरिहेति धीश्च द्वयदर्शने स्यात्।
न च क्वचित् तद्विषये त्वपेक्षा स्वकल्पनामात्रमतोऽभ्युपायः॥"

एतेन येयं प्रत्ययानुवृत्तिरनुवृत्तवस्त्वनुयायिनी कथम-
त्यन्तभेदिनीषु व्यक्तिषु व्यावृत्तविषयप्रत्ययभागानु-
पातिनीषु भवितुमर्हतीत्यूहाप्रवर्तनमस्य प्रत्याख्यातम्।
जातिष्वेव परस्परव्यावृत्ततया व्यक्तीयमानासु अनु-
वृत्तप्रत्ययेन व्यभिचारात्। यत् पुनरनेन विपर्यये
बाधकमुक्तम्, "अभिधानप्रत्ययानुवृत्तिः कुतश्चि-
न्निवृत्य क्वचिदेव भवन्ती निमित्तवती। न चान्यन्नि-
मित्तमित्यादि॥" तन्न सम्यक्। अनुवृत्तमन्तरेणापि
अभिधानप्रत्ययानुवृत्तेरतद्रूपपरावृत्तस्वरूपविशेषात्

फ स्वाश्रयेषु B.

अवश्यं स्वीकारस्य साधितत्वात् । तस्मात्,
"तुल्यभेदे यया जातिः प्रत्यासत्त्या प्रसर्पति।
क्वचिन्नान्यत्र सैवास्तु शब्दज्ञाननिबन्धनम् ॥"

यत् पुनरत्र न्यायभूषणेनोक्तम् - "न ह्येवं भवति ।
[15] यया प्रत्यासत्त्या दण्डसूत्रादिकं प्रसर्पति क्वचित्, नान्यत्र, सैव प्रत्यासत्तिः पुरुषस्फटिकादिषु दण्डिसूत्रित्वादिव्यवहारनिबन्धनमस्तु किं दण्डसूत्रादिनेति ।" तदसङ्गतम् । दण्डसूत्रयोर्हि पुरुष स्फटिकप्रत्यासन्नयोः दृष्टयोः दण्डिसूत्रिप्रत्ययहेतुत्वं नापलप्यते । सामान्यं तु स्वप्नेऽपि न दृष्टं । तद्यदीदं परिकल्पनीयं तदा वरं प्रत्यासत्तिरेव सामान्यप्रत्ययहेतुः परिकल्प्यताम्, किं गुर्व्या परिकल्पनयेत्यभिप्रायापरिज्ञानात् ।

अथेदं जातिप्रसाधकमनुमानमभिधीयते ।
यद्विशिष्टज्ञानं तद् विशेषणग्रहणनान्तरीयकम् ।
यथा दण्डिज्ञानम् । विशिष्टज्ञानं चेदं गौरयमित्यर्थतः कार्यहेतुः । विशेषणानुभवकार्यं हि दृष्टान्ते विशिष्टबुद्धिः ~~सिद्धा~~ सिद्धेति । अत्रानुयोगः, विशिष्टबुद्धे-

फ B here reads दण्डसूत्रत्वादिना ।

भिन्नविशेषणग्रहणनान्तरीयकत्वं वा साध्यम्, विशे-
षणमात्रानुभवनान्तरीयकत्वं वा। प्रथमपक्षे पक्षस्य
प्रत्यक्षबाधा साधनावधानमनवकाशयति, वस्तुग्राहिणः
प्रत्यक्षस्योभयप्रतिभासाभावात्। विशिष्टबुद्धित्वं च
सामान्यम् हेतुरनैकान्तिकः। भिन्नविशेषणग्रहणमन्तरे-
णापि दर्शनात्। यथा स्वरूपवान् घटः। गोत्वं सा-
,, [16] मान्यमिति वा।,, द्वितीयपक्षे तु सिद्धसाधनम्। स्वरूप-
वान् घट इत्यादिवत् गोत्वजातिमान् पिण्ड इति
परिकल्पितं भेदमुपादाय विशेषण-विशेष्यभावस्येष्ट-
त्वादगोव्यावृत्तानुभवभावित्वाद् गौरयमिति व्यवहा-
रस्य। फ तदेवं न सामान्यबुद्धिः। ——→
←— बाधकं च सामान्य-गुण-कर्माद्युपाधिचक्रस्य,
केवलव्यक्तिग्राहकं पटुप्रत्यक्षम्। दृश्यानुपलम्भो वा
प्रसिद्धः।

तदेवं विधिरेव शब्दार्थः। स च बाह्योऽर्थो बुद्ध्या-
कारश्च विवक्षितः। तत्र न बुद्ध्याकारस्य तत्त्वतः
संवृत्या वा विधि-निषेधौ। स्वसंवेदनप्रत्यक्षगम्यत्वा-
त्। अनध्यवसायाच्च। नापि तत्त्वतो बाह्यस्यापि

फ तदेवं न सामान्यसिद्धिः B, Not in A वा.।
B seems to be correct.

~~विधिनिषेधौ तस्य शाब्दे प्रत्ययेऽप्रतिभासनात्।~~
अत एव सर्वधर्माणां तत्त्वतोऽनभिलाप्यत्वं प्रति-
भासाध्यवसायाभावात्। तस्मात् बाह्यस्यैव सांवृतौ
विधि-निषेधौ। अन्यथा संव्यवहारहानिप्रसङ्गात्।
तदेवम्। ~~नाकारस्य न बाह्य~~

"नाकारस्य न बाह्यस्य, तत्त्वतो विधिसाधनम्[फ] ।
बहिरेव हि संवृत्या, संवृत्यापि तु नाकृतेः ।" [क]

एतेन यद् धर्मोत्तरः॥ आरोपितस्य बाह्यत्वस्य
[17] विधि-निषेधावित्यलौकिकमनागममतार्किकीयं
कथयति। तदपहस्तितम्।

नन्वध्यवसाये यद्यध्यवसेयं वस्तु न स्फुरति
तदा तदध्यवसितमिति कोऽर्थः? अप्रतिभासेऽपि
प्रवृत्तिविषयीकृतमिति योऽर्थः। अप्रतिभासाविशे-
षे विषयान्तरपरिहारेण कथं नियतविषया
प्रवृत्तिरिति चेत्? उच्यते —— यद्यपि विश्व-
मगृहीतं तथापि विकल्पस्य नियतसामग्रीप्रसू-
तत्वेन नियताकारतया नियतशक्तित्वात् नियता
एव जलादौ प्रवृत्तिः। धूमस्य परोऽग्निज्ञानज-

फ ०बाधनम् B। क B omits स्य।
बाधनम् is better.

नन वत् । 卐

नियतविषया हि भावाः प्रमाणपरिनिष्ठित-
स्वभावा न शक्तिसाङ्कर्यपर्यनुयोगभाजः। तस्मात्
B omits तत्। ✤ तदध्यवसायित्वमाकारविशेषयोगात् तत्प्रवृत्तिजन-
कत्वम्। न च सादृश्यादारोपेण प्रवृत्तिं ब्रूमः
येनाकारे बाह्यस्य बाह्ये वा आकारस्यारोप-
द्वारेण दूषणावकाशः। किं तर्हि? स्ववासना-
विपाकवशादुपजायमानैव बुद्धिरपश्यन्त्यपि बाह्यं
बाह्ये प्रवृत्तिमातनोतीति विप्लुतैव। तदेवमन्याभा-
// [18] वविशिष्टो विजातिव्यावृत्तोऽर्थो विधिः। स एव
चाऽपोहशब्दवाच्यः शब्दानामर्थः प्रवृत्ति-निवृत्ति-
विषयश्चेति स्थितम्॥

अत्र प्रयोगः। यद् वाचकं तत् सर्वमध्यव-
सितातद्रूपपरावृत्तवस्तुमात्रगोचरम्। यथेह कूपे
जलमिति वचनम्। वाचकं चेदम् गवादिशब्दरूप-
मिति स्वभावहेतुः। नायमसिद्धः, △ पूर्वोक्तेन
△ B omits भाव न्यायेन पारमार्थिकवाच्यवाचकभावस्याऽभावेऽपि,
अध्यवसायकृतस्य सर्वव्यवहारिभिरवश्यस्वीकर्तव्य-

卐 A omits धूमस्य to वत् and adds असदापत्तिवत् । यद्यपि
वह्नौ धूमस्य त्रैलोक्यस्याभावस्तथापि ततो धूमस्यैवोत्पादो नाऽन्यस्य

* सर्वस्य B त्वात् । अन्यथा *सर्वव्यवहारोच्छेदप्रसंगात् । नापि
विरुद्धः सपक्षे भावात् । न चाऽनैकान्तिकः,
तथा हि शब्दानामध्यवसितविजातिव्यावृत्तवस्तुमात्र-
विषयत्वमनिच्छद्भिः परैः परमार्थतो

"वाच्यं स्वलक्षणमुपाधिरुपाधियोगः
सोपाधिरस्तु यदि वाऽऽकृतिरस्तु बुद्धेः ।"

गत्यन्तराभावात् । अविषयत्वे च वाचक-
त्वायोगात् । तत्र ।

"आद्यन्तयोर्न समयः फलशक्तिहाने-
र्मध्येऽप्युपाधिविरहात् त्रितये न युक्तः ।"

तदेवं वाच्यान्तरस्याभावात् । विषयवत्त्वलक्षण-
[19] स्य, व्यापकस्य निवृत्तौ विपक्षतो निवर्तमानं वा-
चकत्वमध्यवसितबाह्यविषयत्वेन व्याप्यत इति
व्याप्तिसिद्धिः ।

शब्दैस्तावन्मुख्यमाख्यायतेऽर्थः
तत्रापोहस्तद्गुणत्वेन गम्यः ।
अर्थश्चैकोऽध्यासतो भासतोऽन्यः
स्थाप्यो वाच्यस्तत्त्वतो नैव कश्चित् ।*

अपोहसिद्धिः समाप्ता ।

* This verse does not appear in B.

कृतिरियं महापण्डितरत्नकीर्तिपादानाम् ॥

भवत्व्यपोहे कृतिनां प्रपञ्चो
[व]स्तुस्वरूपास्फुरणं तु मर्म।
तत्रादृढे सर्वमयत्नशीर्णं
दृढे तु सौस्थ्यं ननु तावतैव।
सम्पूर्णरात्रिप्रहरद्वयेन
कीर्तेरपोहो लिखितः सुखेन।
त्रैलोक्यदत्तेन परात्महेतो-
र्यत्नादतोऽयं परिरक्षणीयः। फ

फ Post-Colophon Verses Not in B.

[२०]

# || क्षणभङ्गसिद्धिः ||

ॐ || नमः समन्तभद्राय ||

आक्षिप्तव्यतिरेका या व्याप्तिरन्वयरूपिणी।
साधर्म्यवति दृष्टान्ते सत्त्वहेतोरिहोच्यते ॥

यत् सत् तत् क्षणिकम्, यथा घटः; सन्तश्चामी विवादास्पदीभूताः पदार्था इति। ॐ

हेतोः परोक्षार्थप्रतिपादकत्वं हेत्वाभासत्वशङ्का-निराकरणमन्तरेण न शक्यते प्रतिपादयितुम्। हेत्वाभासाश्च असिद्ध-विरुद्धा-ऽनैकान्तिकभेदेन त्रिविधाः। तत्र न तावदयमसिद्धो हेतुः। यदि नाम दर्शने दर्शने नानाप्रकारं सत्त्वलक्षणमुक्तमास्ते, अर्थक्रियाकारित्वम्, सत्तासमवायः, स्वरूपसत्त्वम्, उत्पाद-व्यय-ध्रौव्ययोगित्वं प्रमाणविषयत्वम्, Δ सदुपलम्भप्रमाणगोचरत्वं व्यपदेशविषयत्वमित्यादि, तथापि किमनेन अप्रस्तुतेन इदानीमेव निष्टङ्कितेन। यदेव हि

ॐ नमः श्रीलोकनाथाय A। कृभ्रमभेदेन A। Δ °लम्भक° A।

~~प्रमाणतो निरूप्यमाणं पदार्थानां सत्त्वमुपपन्नं~~
[21] भविष्यति; तदेव वयमपि स्वीकरिष्यामः। केवलं यदेतदर्थक्रियाकारित्वं सर्वजनप्रसिद्धमास्ते; तत् खलु अत्र सत्त्वशब्देनाऽभिसन्धाय साधनत्वेनोपात्तम्। तच्च यथायोगं प्रत्यक्षानुमानप्रमाणप्रसिद्धसद्भावेषु भावेषु पक्षीकृतेषु प्रत्यक्षादीनां प्रमाणेन प्रतीतमिति न स्वरूपेणाश्रयद्वारेण वाऽसिद्धसम्भावनाऽपि।

नाऽपि विरुद्धः। सपक्षीकृते सद्भावात्। ननु कथमस्य सपक्षत्वम्? पक्षवदत्रापि क्षणभङ्गासिद्धेः। न ह्यस्य प्रत्यक्षतः क्षणभङ्गसिद्धिः तथात्वेनाऽनिश्चयात्। नाऽपि सत्त्वानुमानतः। पुनर्निदर्शनान्तरापेक्षायामनवस्थाप्रसङ्गात्। न चान्यदनुमानमस्ति। सम्भवे वा तेनैव पक्षेऽपि क्षणभङ्गसिद्धेरलं सत्त्वानुमानेनेति चेत्। उच्यते। अनुमानान्तरमेव प्रसङ्गप्रसङ्गविपर्ययात्मकं घटे क्षणभङ्गप्रसाधकं प्रमाणान्तरमस्ति, तथा [हि] घटो वर्तमानक्षणे तावत् एकामर्थक्रियां करोति। अतीतानागतक्षणयोरपि किं

फ स्वरूपद्वारेण A। कृ विरुद्धता A। Δ पुनर्निदर्शनापेक्षायां A। ▽ घटस्य A।
⊕ प्रमाणमस्ति A। + तथा हि A। ∺ अतीतानागतयोः A।

(1) तामेवाऽर्थक्रियां (2) कुर्यादन्यां वा, (3) न वा कामपि[1]
[22] क्रियामिति त्रयः पक्षाः। नात्र प्रथमपक्षो
युक्तः कृतस्य करणायोगात्। अथ द्वितीयोऽ-
भ्युपगम्यते. तदिदमत्र[2] विचार्यताम्। यदा
घटो वर्तमानक्षणभावि कार्यं करोति तदा किम
तीतानागतक्षणभाविन्यपि कार्ये शक्तोऽशक्तो वा।
यदि शक्तस्तदा वर्तमानक्षणभाविकार्यवत् अती-
तानागतक्षणभाव्यपि कार्यं कुर्यात्[3]। तत्रापि
शक्तत्वात्, शक्तस्य क्षेपायोगात्। अन्यथा वर्त-
मानक्षणभाविनोऽपि कार्यस्याऽकरणप्रसङ्गात्
पूर्वापरकालयोरपि शक्तत्वेन अविशेषात्,
समर्थस्य च सहकार्यपेक्षाया अयोगात्। अथाऽ-
शक्तस्तदा एकत्र कार्ये शक्ताशक्तत्वविरुद्धधर्मा-
ध्यासात् क्षणविध्वंसो[4] घटस्य दुर्वारप्रसरः स्यात्।
नाऽपि तृतीयः पक्षः संगच्छते शक्तस्व-
भावानुवृत्तेरेव। यदा हि शक्तस्य स्वभावस्य[5]
विलम्बोऽप्यसह्यस्तदा दूरोत्सारितमकरणम्।
अन्यथा वार्तमानिकस्यापि कार्यस्याऽकरणं

1 कामपीति A। 2 तदेतदत्र A। 3 B adds तदापि। 4 ध्वंसः A।
5 पदार्थस्य A।

स्यात् इत्युक्तम्। तस्माद् यद् यदा ~~[illegible]~~ यज्जनन-
व्यवहारपात्रम्, तत् तदा तत् कुर्यात्। अकुर्वच्च
[२३] न जननव्यवहारभाजनम्। तदेवमेकत्र कार्ये समर्थेत-
रस्वभावतया प्रतिक्षणं भेदात् घटस्य ~~सप~~क्षत्वमक्षतम्।

अत्र प्रयोगः। यद् यदा यज्जननव्यवहारयोग्यं
तत् तदा तज्जनयत्येव। यथा अन्त्या कारणसामग्री
स्वकार्यम्। अतीतानागतक्षणभाविकार्यजननव्यवहार-
योग्यश्चायं घटो वर्तमानक्षणभाविकार्यकरणकाले
सकलक्रियातिक्रमकालेऽपीति स्वभावहेतुप्रसङ्गः। अस्य
च द्वितीयादिक्षणभाविकार्यकरणव्यवहारगोचरत्वस्य
प्रसङ्गसाधनस्य वार्तमानिककार्यकरणकाले सकल-
क्रियातिक्रमकाले च घटे धर्मिणि पराभ्युपगममात्रतः
सिद्धत्वात् असिद्धिस्तावदसम्भविनी। नापि विरुद्ध-
ता, सपक्षे अन्त्यकारणसामग्र्यां सद्भावसम्भवात्।

नन्वयं साधारणानैकान्तिको हेतुः। साक्षादज-
नकेऽपि कुशूलाद्यवस्थितबीजादौ विपक्षे समर्थव्यवहार
गोचरत्वस्य साधनस्य दर्शनादिति चेत्। न। द्विविधे
हि समर्थव्यवहारः[फ] पारमार्थिकः औपचारिकश्च। तत्र

फ सामर्थ्यव्य० A।

यत् पारमार्थिकं जननप्रयुक्तं जननव्यवहारगोचरत्वं तदिह साधनत्वेन उपात्तम्। तस्य च कुशूला-
[२५] द्यवस्थितबीजादौ कारणकारणत्वात् औपचारिकजननव्यवहारविषयभूते सम्भवाभावात् कुतः साधारणानैकान्तिकता। न चास्य सन्दिग्धव्यतिरेकिता[1] विपर्यये बाधकप्रमाणसद्भावात्। तथा हीदं जननव्यवहारगोचरत्वं[2] नियतविषयत्वेन व्याप्तमिति सर्वजनानुभवसिद्धम्। न चेदं निर्निमित्तम्। देशकालस्वभावनियमाभावप्रसङ्गात्। न च जननादन्यन्निमित्तमुपलभ्यते। तदन्वयव्यतिरेकानुविधानदर्शनात्।

यदि च जननमन्तरेणाऽपि जननव्यवहारगोचरत्वं स्यात् तदा सर्वस्य सर्वत्र जननव्यवहार इत्यनियमः स्यात्। नियतश्चायं प्रतीतः। ततो जननाभावे विपक्षे नियतविषयत्वस्य व्यापकस्य निवृत्तौ निवर्तमानं जननव्यवहारगोचरत्वं जनन एव विश्राम्यतीति व्याप्ति-

1 °कता B। 2 °प्रसिद्धम् B।

सिद्धेरनवद्यो हेतुः। न चैष घटो वर्तमानकार्यकरण-
क्षणे सकलक्रियातिक्रमणे[1] च अतीतानागतक्षण-
भावि कार्यं जनयति। ततो न जननव्यवहारयो-
ग्यः। सर्वः प्रसंगः प्रसंगविपर्ययनिष्ठ इति न्यायात्।

अत्रापि प्रयोगः — यद् यदा यन्न करोति न तत्
[25] तदा तत्र समर्थव्यवहारयोग्यं यथा शाल्य-
ङ्कुरमकुर्वन् कोद्रवः शाल्यङ्कुरे। न करोति चैष
घटो वर्तमानक्षणभाविकार्यकरणकाले सकलक्रिया-
तिक्रमकाले चातीतानागतक्षणभाविकार्यमिति
व्यापकानुपलब्धिर्भिनत्ति समर्थक्षणादसमर्थक्षणम्।

अत्राप्यसिद्धिर्नास्ति वर्तमानक्षणभाविकार्यक-
रणकाले सकलक्रियातिक्रमकाले च अतीताना-[2]
गतक्षणभाविकार्यकरणस्याऽयोगात्[3]। नापि विरोधः।
सपक्षे भावात्। न चानैकान्तिकता पूर्वोक्तेन
न्यायेन समर्थव्यवहारगोचरत्वजनकत्वयोर्विधि-
भूतयोः सर्वोपसंहारवत्या व्याप्तेः प्रसाधनात्।

यत् पुनरत्रोक्तम् — यद् यदा यन्न करोति
न तत् तदा तत्र समर्थमित्यत्र कः करोत्यर्थः।

1 °क्रमकाले A। 2 अतीतादिक्षण° A। 3 असम्भवात् N।
(°क्रमक्षणे?)

किं कारणत्वम्। तत्कार्योत्पादानुगुणसहकारिसा-
कल्यम्। आहोस्वित् कार्याव्यभिचारः। कार्य-
सम्बन्धो वेति। तत्र कारणत्वमेव [redacted] करोत्यर्थः।
ततः पश्चात्प्रभाविनो दोषा अनभ्युपगमप्रति-
हताः।

न चात्र पक्षे कारणत्वसामर्थ्ययोः पर्यायत्वेन
[26] व्यापकानुपलम्भस्य" साध्याविशिष्टत्वमभिधातु-
मुचितम्। समर्थव्यवहारगोचरत्वाभावस्य साध्य-
त्वात्। कारणत्वसमर्थव्यवहारगोचरत्वयोश्च
वृक्ष-शिंशपयोरिव व्यावृत्तिभेदोऽस्तीत्यनवसरः एव
एवंविधस्य क्षुद्रप्रलापस्य। तदेवं प्रसंगप्रसंगविप-
र्ययहेतुद्वयबलतो घटे दृष्टान्ते क्षणभङ्गः सिद्धः।
तत कथं सत्त्वादन्यदनुमानं दृष्टान्ते क्षण-
भङ्गसाधकम् नास्तीत्युच्यते। न चैवं सत्त्व-
हेतोर्वैयर्थ्यम्। दृष्टान्तमात्र एव प्रसङ्गप्रसङ्गवि-
पर्ययाभ्यां क्षणभङ्गप्रसाधनात्। नन्वाभ्यामेव
पक्षेऽपि क्षणभङ्गसिद्धिरस्त्विति चेत्। अस्तु
को दोषः। यो हि प्रतिपत्ता प्रतिवस्तु यद्

1 B has उत for तत्। 2 प्रसङ्ग-तद्विपर्ययाभ्यां A।
B is better.

यदा यज्जननव्यवहारयोग्यं तत् तदा तज्जनयती-
त्यादिकमुपन्यसितुम्। अनलसस्तस्य तत एव क्षण-
भङ्गसिद्धिः। यस्तु प्रतिवस्तु तन्न्यायोपन्यासप्रयास-
भीरुः स[1] त्वेकत्र धर्मिणि यद् यदा यज्जननव्य-
वहारयोग्यं तत् तदा तज्जनयतीत्यादिन्यायेन
सत्त्वमात्रमस्थैर्यव्याप्तमवधार्य सत्त्वादेवाऽन्यत्र
क्षणिकत्वमवगच्छतीति कथमप्रमत्तो वैयर्थ्यमस्या-
चक्षीत। तदेवमेकार्थकारिणो घटस्य द्वितीयादि-
क्षणभाविकार्यापेक्षया[2] समर्थेतरस्वभावविरुद्धधर्मा-
[27] ध्यासात् भेद एवेति क्षणभङ्गतया सपक्षतामाव-
हति घटे सत्त्वहेतुरुपलभ्यमानो न विरुद्धः।

[3] न चायमनैकान्तिकः। अत्रैव साधर्म्यवति दृष्टा-
न्ते सर्वोपसंहारवत्या व्याप्तेः प्रसाधनात्। ननु
विपर्यये बाधकप्रमाणबलाद् व्याप्तिसिद्धिस्तस्य
चोपन्यासवार्तापि नास्ति, तत् कथं व्याप्तिः
प्रसाधितेति चेत्। तदेतत् तरलतरबुद्धिविलसि-
तम्। तथा हि उक्तमेतत् वर्तमानक्षणभाविकार्य-
करणकाले अतीतानागतक्षणभाविकार्येऽपि घटस्य

1 स खल्वेकत्र A। 2 क्षणान्तरभावि० A। 3 न चानैकान्तिकः A।

शक्तिसम्भवे तदानीमेवैतत् करणमकरणे च शक्ताशक्तस्वभावतया प्रतिक्षणं भेद इति अनैकान्त्येन व्याप्तैव सा अर्थक्रियाशक्तिः।

नन्वेवमन्वयमात्रमस्तु, विपक्षात् पुनरेकान्तेन व्यावृत्तिरिति कुतो लभ्यमिति चेत्; व्याप्तिसिद्धेरेव। व्यतिरेकसन्देहे व्याप्तिसिद्धिरेव कथमिति चेत्, न। द्विविधा हि व्याप्तिसिद्धिरन्वयरूपा च कर्तृधर्मः - साधनधर्मवति धर्मिणि साध्यधर्मस्यावश्यंभावो यः। व्यतिरेकरूपा च कर्मधर्मः - साध्याभावे साधनस्य अवश्यमभावो यः। एनयोश्चैकतर-

(र्नि) प्रतीतिनियमेन [1]द्वितीयप्रतीतिमाक्षिपति।

[२४] अन्यथा, एकस्याः एव सिद्धेः। तस्मात्।

फ (एवासिद्धेः ?) यथा विपर्यये बाधकप्रमाणबलात् नियमवति व्यतिरेके सिद्धे अन्वयविषयः संशयः पूर्वं स्थितोऽपि पश्चात् परिगलति। ततोऽन्वयप्रसाधनार्थं न पृथक् साधनमुच्यते। तथा प्रसङ्गतद्विपर्ययहेतुद्वयबलात्तो नियमवत्यन्वये

1 द्वितीयमाक्षिपति A।

३६

सिद्धे व्यतिरेकविषये पूर्वं स्थितोऽपि सन्देहः पश्चा-
त् परिगलत्येव। न च व्यतिरेक[1]साधकमन्यत् प्रमा-
णं वक्तव्यम्। ततश्च साध्याभावे साधनस्यैका-
न्तिको व्यतिरेकः साधने सति साध्यस्य अवश्य-
मन्वयो वेति न कश्चिदर्थभेदः। तदेवं विपर्यय-
बाधकप्रमाणमन्तरेणापि प्रसंग-प्रसंगविपर्ययहेतु-
द्वयबलात् अन्वयरूपव्याप्तिसिद्धौ सत्त्वहेतोरनै-
कान्तिकस्याभावादतः साधनात् क्षणभङ्गसिद्धि-
रनवद्येति।

ननु च साधनमिदमसिद्धम्, न हि कारणबुद्ध्या कार्यं
गृह्यते। तस्य भावित्वात्। न च कार्यबुद्ध्या कारणम्। तस्या-
ऽतीतत्वात्। न च वर्तमानग्राहिणा ज्ञानेन अतीतानागतयो-
र्ग्रहणमतिप्रसङ्गात्। न च पूर्वापरयोः कालयोरेकः
[२१] प्रतिसन्धातास्ति क्षणभङ्गभङ्गप्रसङ्गात्। कारणाभावे तु
कार्याभावप्रतीतिः स्वसम्वेदनवादिनो मनोरथस्याऽप्यवि-
षयः। न च पूर्वोत्तरकालयोः संवित्ती, ताभ्यां वासना,
तया च हेतुफलावसायी विकल्प इति युक्तम्। स हि
विकल्पो गृहीतानुसन्धायकोऽतद्रूपसमारोपको वा।

1 साधन° A।

~~न प्रथमः पक्षः। एकस्य प्रतिसन्धातुरभावे पूर्वापरग्रहणयो-~~
रयोगात्। विकल्पवासनाया एवाऽभावात्। नापि द्वितीयः,
मरीचिकायामपि जलविज्ञानप्रामाण्यप्रसङ्गात्। तदेवमन्वय-
व्यतिरेकयोरप्रतिपत्तेरर्थक्रियालक्षणं सत्त्वमसिद्धमिति॥

किञ्च, प्रकारान्तरादपीदं साधनमसिद्धम्। तथाहि
बीजादीनां सामर्थ्यं बीजादिज्ञानात् कार्यादङ्कुरादेर्वा निश्चे-
तव्यम्। कार्यत्वं च वस्तुत्वसिद्धौ सिध्यति, वस्तुत्वं च कार्या-
न्तरात्। कार्यान्तरस्यापि कार्यत्वं वस्तुत्वसिद्धौ। तद्वस्तुत्वं
च तदपरकार्यान्तरादित्यनवस्था। अथ अनवस्थाभयात्
पर्यन्ते कार्यान्तरं नापेक्ष्यते तदा तेनैव पूर्वेषामसत्त्वप्रस-
ङ्गात् नैकस्याप्यर्थक्रियासामर्थ्यं सिध्यति। ननु कार्यत्वसत्त्व-
[5]
योर्भिन्नव्यावृत्तिकत्वात् सत्तासिद्धावपि कार्यत्वसि-
द्धौ का क्षतिरिति चेत्। तदसङ्गतम्, सत्यपि कार्यत्वस-
त्त्वयोर्व्यावृत्तिभेदे सत्त्व(त्वा)सिद्धौ कुतः कार्यत्वसिद्धिः।
[३०] कार्यत्वं ह्यभूत्वाभावित्वम्, भवनं च सत्ता। सत्ता च
सौगतानां सामर्थ्यमेव। ततश्च सामर्थ्यसन्देहे भवतीत्येव
वक्तुमशक्यं कथमभूत्वाभावित्वं कार्यत्वं सेत्स्यति। अपेक्षित-
परव्यापारत्वं कार्यत्वमित्यपि नाऽसतो धर्मः, सत्त्वं च

सामर्थ्यम् तच्च सन्दिग्धमिति कुतः कार्यसिद्धिः तदसिद्धौ पूर्वस्य सामर्थ्यं न सिध्यतीति। सन्दिग्धासिद्धो हेतुः।

तथा विरुद्धोऽप्ययम्। तथा हि—क्षणिकत्वे सति न तावत् अजातस्य अनन्वयनिरुद्धस्य वा कार्यारम्भकत्वं सम्भवति। न च निष्पन्नस्य तावान् क्षणोऽस्ति यमुपादाय कस्मैचित् कार्याय व्यापार्येत। अतः क्षणिकपक्ष एव अर्थक्रियानुपपत्तेर्विरुद्धता। अथवा विकल्पेन यदुपनीयते ~~सद्वस्तु~~ तत्सर्वमवस्तु। ततश्च वस्त्वात्मके क्षणिकत्वे साध्येऽवस्तूपस्थापयन्ननुमानविकल्पो विरुद्धः। यद्वा सर्वस्यैव हेतोः क्षणिकत्वे साध्ये विरुद्धत्वं देशकालान्तराननुगमे साध्यसाधनभावाभावात् अनुगमे च नानाकालमेकमक्षणिकं क्षणिकत्वेन विरुध्यते इति।

अनैकान्तिकोऽप्ययम् सत्त्व-स्थैर्ययोर्विरोधाभावादिति।

[31] अत्रोच्यते— "यत् तावदुक्तं सामर्थ्यं न प्रतीयत इति" तत् किं सर्वथैव न प्रतीयते क्षणभङ्गपक्षे वा? प्रथमपक्षे सकलकारकज्ञापकहेतुचक्रोच्छेदात् मुखस्पन्दनमात्रस्याऽप्यकरणप्रसङ्गः। अन्यथा

येनैव वचनेन सामर्थ्यं नास्तीति प्रतिपाद्यते
तस्यैव तत्प्रतिपादनसामर्थ्यमव्याहतमायातम् ।
तस्मात् परमपुरुषार्थसमीहया वस्तुतत्त्वनिरूपणप्रवृत्त-
स्य शक्तिस्वीकारपूर्व(र्वि)कैव प्रवृत्तिः । तदस्वीकारे
तु न कश्चित् क्वचित् प्रवर्तेत इति निरीहं जग-
ज्जायेत । अथ द्वितीयः पक्षः, तदा अस्ति तावत्
सामर्थ्यप्रतीतिः । सा च क्षणिकत्वे यदि नोपपद्यते
तदा विरुद्धं वक्तुमुचितम् । असिद्धमिति तु न्याय
भूषणीयः प्रायो विलापः । न च सत्यपि क्षणिकत्वे
सामर्थ्यप्रतीतिव्याघातः । तथा हि [1]कारणज्ञानोपादेय-
भूतेन कार्यग्राहिणा ज्ञानेन तदर्पितसंस्कारगर्भेण
अस्य भावे अस्य भाव इति अन्वयनिश्चयो जन्यते
तथा कारणापेक्षया भूतलकैवल्यग्राहिज्ञानोपादेयभूतेन
कार्यापेक्षया भूतलकैवल्यग्राहिणा ज्ञानेन तदर्पित-
संस्कारगर्भेण अस्याभावेऽस्याभाव इति व्यतिरेक
निश्चयो जन्यते । यदाहुर्गुरवः —

[32] एकोवसायसमनन्तरजातमन्य-
विज्ञानमन्वयविमर्शमुपादधाति ।

1 कारणग्राहिज्ञानो॰ A ।

एवं तदेकविरहानुभवोद्भवान्य-

व्यावृत्तधीः प्रथयति व्यतिरेकबुद्धिम् ।

एवं सति गृहीतानुसन्धायके (क) एवायं विकल्पः

उपादानोपादेयभूतक्रमिप्रत्यक्ष[1]द्वयगृहीतानुसन्धानात् ।

यदाह अलङ्कारः —

यदि नामैकमध्यक्षं न पूर्वापरवित्तिमत्[2] ।

अध्यक्षद्वयसद्भावे प्राक्परावेदनं कथम् ।

नापि द्वितीयोऽसिद्ध[3]प्रभेदः । सामर्थ्यं हि सत्त्व-
मिति सौगतानां स्थितिरेषा । न चैतत्प्रसाधना-
र्थमस्माकमिदानीमेव प्रारम्भः, किन्तु यत्र प्रमाण-
प्रतीते बीजादौ वस्तुभूते धर्मिणि प्रमाणप्रतीतं
सामर्थ्यं तत्र क्षणभङ्ग[4]साधनाय । ततश्च अंकुरादीनां
कार्यादर्शनात् आहत्य सामर्थ्यसन्देहेऽपि पटुप्रत्यक्ष-
प्रसिद्धं सन्मात्रत्वमवधार्यमेव । अन्यथा न क्वचिदपि
वस्तुमात्रस्याऽपि प्रतिपत्तिः स्यात् । तस्माच्छास्त्रीय-
सत्त्वलक्षणसन्देहेऽपि पटुप्रत्यक्षबलावलम्बितवस्तुभावे
अङ्कुरादौ कार्यत्वमुपलभ्यमानं बीजादेः सामर्थ्यमुप-
[33] स्थापयतीति नासिद्धिदोषावकाशः ।

1 °प्रत्यय° A । 2 °वृत्तिमत् A । 3 °सिद्धि° A ।
4 प्रसाधनाय A ।

नापि क्षणिकत्वे सामर्थ्यक्षतिः। यतो विरुद्धता स्यात्। क्षणिकत्वनियतप्राग्भावित्वलक्षणकारणत्वयोर्विरोधाभावात्, क्षणमात्रस्थायिन्यपि सामर्थ्यसम्भवादिति नादिमो विरोधः। नापि द्वितीयो विरोधप्रभेदः। अवस्तुनो वस्तुनो वा स्वाकारस्य ग्राह्यत्वेऽपि अध्यवसेयवस्त्वपेक्षया एव सर्वत्र प्रामाण्यप्रतिपादनात् वस्तुस्वभावस्यैव क्षणिकत्वसिद्धिरिति क्व विरोधः।

यच्च गृह्यते यच्चाऽध्यवसीयते ते द्वे अपि अन्यनिवृत्ती न वस्तुनी स्वलक्षणावगाहित्वे अभिलापसंसर्गानुपपत्तेरिति चेत्। न। अध्यवसाय स्वरूपापरिज्ञानात्। अगृहीतेऽपि वस्तुनि मानस्यादिप्रवृत्तिकारकत्वं विकल्पस्याऽध्यवसायित्वं अप्रतिभासेऽपि प्रवृत्तिविषयीकृतत्वमध्यवसेयत्वम्। एतच्च अध्यवसेयत्वं स्वलक्षणस्यैव युज्यते नाऽन्यस्य, अर्थक्रियार्थित्वात् अर्थिप्रवृत्तेः। एवं चाऽध्यवसाये स्वलक्षणस्य अस्फुरणमेव। न च तस्य अस्फुरणेऽपि सर्वत्र अविशेषेण प्रवृत्त्याक्षेपप्रसंगः;

प्रतिनियतसामग्रीप्रसूतात् प्रतिनियतस्वाकारात्
[34] प्रतिनियतशक्तियोगात् प्रतिनियते एव अतद्रूपप-
रावृत्ते[1]ऽप्रतीतेऽपि प्रवृत्तिसामर्थ्यदर्शनात्। यथा सर्वस्य
असत्त्वेऽपि बीजादंकुरस्यैव [redacted] उत्पत्तिः, दृष्टस्य
नियतहेतुफलभावस्य प्रतिक्षेप्तुमशक्यत्वात्। परं
बाह्येनाऽर्थेन सति प्रतिबन्धे प्रामाण्यम्, अन्यथा
तु अप्रामाण्यमिति विशेषः।

तथा तृतीयोऽपि पक्षः प्रयासफलः, नानाका-
रस्य एकस्यैकस्य वस्तुनो वस्तुतोऽसम्भवेऽपि अत-
द्रूपपरावृत्तयोरेव साध्य-साधनयोः प्रत्यक्षेण व्याप्ति-
ग्रहणात्। द्विविधो हि प्रत्यक्षस्य विषयो ग्राह्यो-
ऽध्यवसेयश्च। सकलातद्रूपपरावृत्तवस्तुमात्रं साक्षाद
स्फुरणात् प्रत्यक्षस्य ग्राह्यो विषयो मा भूत्। तदे-
कदेशग्रहणे तु तन्मात्रयोर्व्याप्तिनिश्चायकविकल्पज-
ननादध्यवसेयो विषयो भवत्येव क्षणग्रहणे सन्तान-
निश्चयवत्। रूपमात्रग्रहणे घटनिश्चयवच्च। अन्यथा
सर्वानुमानोच्छेदप्रसङ्गात्। [2] तथा हि व्याप्तिग्रहः
सामान्ययोः विशेषयोः सामान्यविशिष्टविशेषयोः

1° वृत्ते एव स्वलक्षणे ऽप्रतीते° A। 2 सामान्यविशिष्टस्वलक्षणयोः
स्वलक्षणविशिष्टसामान्ययोः A।

विशेषविशिष्टसामान्ययोः वा इति विकल्पाः।
नाद्यो विकल्पः, सामान्यस्य बाध्यत्वात्। अबाध्यत्वेऽपि अदृश्यत्वात्। दृश्यत्वेऽपि पुरुषार्थानुपयोगितया
[35] तस्याऽनुमेयत्वायोगात्।" नाऽप्यनुमितात् सामान्यात् विशेषानुमानम्, सामान्यसर्वविशेषयोर्वक्ष्यमाणन्यायेन प्रतिबन्धप्रतिपत्तेरयोगात्।
नापि द्वितीयो विशेषस्याऽननुगामित्वात्। अन्तिमे तु विकल्पद्वये सामान्याधारतया दृष्ट एव विशेषः सामान्यस्य विशेष्यो विशेषणं वा कर्तव्यः; अदृष्ट एव वा देशकालान्तरवर्ती, यद्वा दृष्टादृष्टात्मको देशकालान्तरवर्ती अतद्रूपपरावृत्तः सर्वो विशेषः।
न प्रथमः पक्षः, अननुगामित्वात्। नापि द्वितीयः, अदृष्टत्वात्। न च तृतीयः, प्रस्तुतैकविशेषदर्शनेऽपि देशकालान्तरवर्तिनामदर्शनात्।

अथ तेषां सर्वेषामेव विशेषाणां सदृशत्वात् सदृशसामग्रीप्रसूतत्वात् सदृशकार्यकारित्वादिति प्रत्यासत्त्या एकविशेषग्राहकं प्रत्यक्षमतद्रूपपरावृत्तमात्रे निश्चयं जनयद् घटग्राहकं व्यवस्थाप्यते;

~~अन्यथा घटोऽपि घटसन्तानोऽपि प्रत्यक्षतो न सिध्ये-~~
त्, सर्वात्मना ग्रहणाभावात् । तदेकदेशग्रहणं तु
अतद्रूपपरावृत्तेऽपि अविशिष्टम् । यद्येवमनेनैव
क्रमेण सर्वस्य विशेषस्य विशेषण-विशेष्य-
[36] भाववत् व्याप्तिप्रतिपत्तिरप्यस्तु । तत् किमर्थं
नानाकालमेकमक्षणिकमभ्युपगन्तव्यं येन क्षणिकत्वे
साधनस्य विरुद्धत्वं स्यात् इति न कश्चिद् विरो-
धप्रभेदप्रसङ्गः ।

न चायमनैकान्तिकोऽपि हेतुः, पूर्वोक्तक्रमेण साध-
र्म्यदृष्टान्ते प्रसंगविपर्ययहेतुभ्यामन्वयरूपव्याप्तेः
प्रसाधनात् । ननु यदि प्रसंगविपर्ययहेतुद्वयबल-
तो घटे दृष्टान्ते क्षणभङ्गः सिध्येत् तदा सत्त्वस्य
नियमेन क्षणिकत्वेन व्याप्तिसिद्धेरनैकान्तिकत्वं न
स्यादिति युक्तम् । केवलमिदमेव असम्भवि । तथा-
हि— शक्तोऽपि घटः क्रमिकार्यापेक्षया क्रमिकार्यं
करिष्यति ।

न चैतद् वक्तव्यम् — समर्थोऽर्थः स्वरूपेण करोति
स्वरूपं च सर्वदा अस्ति इति अनुपकारिणि

~~सहकारिणि। अपेक्षा न युज्यत इति। सत्यपि~~

Compare with P. 58

स्वरूपेण कारकत्वे सामर्थ्याभावात् कथं करोति ?
सहकारिसाकल्यं हि सामर्थ्यम्, तद्वैकल्यं च असा-
मर्थ्यम्। न च तयोराविर्भावतिरोभावाभ्यां तद्वतः
काचित् क्षतिः, तस्य ताभ्यामन्यत्वात्। तस्माद-
र्थः समर्थोऽपि स्यात् न च करोतीति सन्दिग्ध-
व्यतिरेकः प्रसंगहेतुः।

अत्रोच्यते — भवतु तावत् सहकारिसाकल्यमेव
सामर्थ्यम्। तथापि सोऽपि तावद् भावः स्वरूपेण
[37] कारकः,,, तस्य च यादृशश्चरमक्षणेऽक्षेपक्रियाधर्मा स्वभावः
तादृश एव चेत् प्रथमक्षणे तदा तदापि प्रसह्य कुर्वा
णो ब्रह्मणाऽप्यनिवार्यः। न च सोऽपि अक्षेपक्रियाधर्मा
स्वभावः साकल्ये सति जातो भावाद् भिन्न एवाऽभि-
धातुं शक्यः, भावस्याऽकर्तृत्वप्रसंगात्। एवं यावद्
यावत् धर्मान्तरपरिकल्पस्तावत् तावदुदासीनो भावः।
तस्माद् यद्रूपमादाय स्वरूपेणापि जनयतीत्युच्यते
तस्य प्रागपि भावे कथमजनिः कदाचित्। अक्षेप-
क्रियाप्रत्यनीकस्वभावस्य प्राच्यस्य पश्चादनुवृत्तौ कथं

कदाचिदपि कार्यसम्भवः। ननु यदि स एवैकः कर्ता स्यात् युक्तमेतत्। किन्तु सामग्री जनिका, ततः सहकार्यन्तरविरहवेलायां बलीयसोऽपि न कार्यप्रसवः इति किमत्र विरुद्धम्। न हि भावः स्वरूपेण करोतीति स्वरूपेणैव करोति, सहकारिसहितादेव ततः कार्योत्पत्तिदर्शनात्। तस्माद् व्याप्तिवत् कार्यकारणभावोऽपि एकत्र अन्ययोगव्यवच्छेदेन अन्यत्र अयोगव्यवच्छेदेन (नाऽ) नावबोद्धव्यः, तथैव लौकिकपरीक्षकाणां सम्प्रतिपत्तेरिति।

Compare with P. 59.

अत्रोच्यते— यदा मिलिताः सन्तः कार्यं कुर्वते तदैकार्थकरणलक्षणं सहकारित्वमेषामस्तु को निषेद्धा। मिलितैरेव तु तत् कार्यं कर्तव्यमिति कुतो लभ्यते। "पूर्वापरयोरेकस्वभावत्वाद् भावस्य सर्वदा जननाजननयोरन्यतर[1]नियमप्रसंगस्य दुर्वारत्वात्। तस्मात् सामग्री जनिका नैकं जनकमिति स्थिरवादिनां मनोरथस्याप्यविषयः। दृश्यते तावदेवमिति चेत्, दृश्यताम्, किन्तु पूर्वस्थितादेव सामग्रीमध्यप्रविष्टाद् भावात् कार्योत्पत्तिरन्यस्मादेव वा विशिष्टाद्

[38] Compare with P. ~~68~~ 67

1 ° नियम° B।

भावादुत्पन्नादिति विवादपदम्। तत्र प्रागपि
सम्भवे सर्वदैव कार्योत्पत्तिर्न वा कदाचिदपीति
विरोधमसमाधाय चक्षुषी निमील्य तत एव
कार्योत्पत्तिदर्शनादिति साध्यानुवाद[1]मात्रप्रवृत्तः कृपामर्हतीति।
Compare with P.68-69.
न च प्रत्यभिज्ञा[2]आदिबलादेकत्वसिद्धिः, तत्पौरुषस्य
लूनपुनर्जातकेशनखादिष्वप्युपलम्भतो निर्दलनात्।
लक्षणभेदस्य च दर्शयितुमशक्यत्वात्। स्थिरसिद्धि-
दूषणे चास्माभिः ~~[illegible]~~ प्रपञ्चतो
निरस्तत्वात्। तस्मात् साक्षात् कार्यकारण-
भावापेक्षया उभयत्राऽप्यन्ययोगव्यवच्छेदः। व्याप्तौ
तु साक्षात् परम्परया कारणमात्रापेक्षया कारणे
व्यापकेऽयोगव्यवच्छेदः कार्ये [3]व्याप्येऽन्ययोगव्यवच्छेदः।
तथा तदतत्स्वभावे व्यापकेऽयोगव्यवच्छेदः। तत्स्व-
[39] भावे च व्याप्येऽन्ययोगव्यवच्छेदः विकल्पारूढरू-
पापेक्षया व्याप्तौ द्विविधमवधारणम्। ननु यदि
पूर्वापरकालयोरेकस्वभावो भावः सर्वदा जनकत्वेन
अजनकत्वेन वा व्याप्त उपलब्धः स्यात् तदाऽयं
प्रसंगः संगच्छते, न च क्षणभंगवादिना पूर्वापरका-

1 A omits मात्र। 2 A omits आदि। 3 A omits व्याप्ये।

लयोरेकः कश्चित् उपलब्ध इति चेत्, तदेतदति-
ग्राम्यम्। तथा हि 'पूर्वापरकालयोरेकस्वभावत्वे
सति' इत्यस्य अयमर्थः — परकालभावी जनको
यः स्वभावो भावस्य स एव यदि पूर्वकालभावी
पूर्वकालभावी वा योऽजनकः स्वभावः स एव
यदि परकालभावी तदा उपलब्धमेव जननमजननं
वा स्यात्। तथा च सति सिद्धयोरेव स्वभावयो-
रेकत्वारोपे सिद्धमेव जननमजननं वा आसज्यते
इति।

Compare with p. 78 58 ननु कार्यमेव[1] सहकारिणमपेक्षते, न तु कार्योत्प-
त्तिहेतुः। यस्मात् द्विविधं सामर्थ्यं निजमागन्तु-
कं च सहकार्यन्तरं, ततोऽक्षणिकस्यापि क्रमवत्स-
हकारिनानात्वादपि क्रमवत्कार्योत्पत्तेरशक्यं भावानां
प्रतिक्षणमन्यान्यत्वमुपपादयितुमिति चेत्। उच्यते।
भवतु तावत् निजागन्तुकभेदेन द्विविधं सामर्थ्यम्
[40] तथापि यत् प्रातिस्विकं वस्तुस्वलक्षणमर्थ[2]क्रियाधर्मक-
मवश्यमभ्युपगन्तव्यं तत् किं प्रागपि पश्चादेव
Compare with p. 68. वेति विकल्प्य यद्दूषणमुद्गीरितं[3] तत्र किमुक्तमनेन-

1 A adds हि। 2 B has सद्यः for अर्थ। 3 °मुदीरितं A। B seems to be better.

ति न प्रतीमः। यत्तु कार्येणैव सहकारिणोऽपेक्ष्यन्ते
इत्युपस्कृतं तदपि निरुपयोगम्। यदि हि कार्यं स्व-
जन्मनि स्वतन्त्रं स्याद् युक्तमेतत्। केवलमेवं
सति सहकारि[1]साकल्यसामर्थ्यकल्पनमफलम्।
स्वातन्त्र्यादेव हि कार्यं कादाचित्कं भविष्यति।
तथा च सति सर्वे हेतवः सर्वथाऽसमर्थाः।
[2]असदेतत् कार्यं स्वतन्त्रमिति विशुद्धा बुद्धिः।
अथ कार्यस्यैवायमपराधः यदिदं समर्थे
कारणे सत्यपि कदाचित् नोत्पद्यत इति चेत्,
न तत् तर्हि तत्कार्यं स्वातन्त्र्यात्। यद् भाष्यम्—
"सर्वावस्थासमानेऽपि कारणे यद्यकार्यता।
स्वतन्त्रं कार्यमेवं स्यान्न तत्कार्यं तथा सति ॥"
अथ न तद्भावे भवतीति तत्कार्यमुच्यते, किन्तु
तदभावे न भवत्येवेति व्यतिरेकप्राधान्यादिति चेत्।
न। यदि हि स्वयम्भवन् भावयेदेव हेतुः स्वकार्यं
तदा तदभावप्रयुक्तोऽस्याऽभाव इति प्रतीतिः स्यात्।
नो चेद्, यथा कारणे सत्यपि कार्यं स्वातन्त्र्या-
[41] न्न भवति, तथा तदभावेऽपि स्वातन्त्र्यादेव न

1 A omits ॰साकल्य॰। 2 असत्तु कार्यं A।
A seems to be better.

~~भूतमिति शङ्का केन निवार्येत। यद् भाष्यम्-~~

तद्भावेऽपि न भावश्चेदभावेऽभाविता कुतः।
तदभावप्रयुक्तोऽस्य (दभा) सोऽभाव इति तत्त कुतः।

तस्माद् यथैव तद्भावे नियमेन न भवति। तथैव तद्भावे नियमेन भवेदेव। अभवच्च न तत्कारणतामात्मनः लभते। यच्चोक्तम्— प्रथमकार्योत्पादनकाले हि उत्तरकार्योत्पादनस्वभावः। अतः प्रथमकाल एव अशेषाणि कार्याणि कुर्यात् इति। तदिदं माता मे वन्ध्या इत्यादिवत् स्ववचनविरोधादयुक्तम्, यो हि उत्तरकार्यजननस्वभावः स कथमादौ कार्यं कुर्यात्। न तर्हि तत्कार्यकरणस्वभावः, न हि नीलोत्पादनस्वभावः पीतादिकमपि करोतीति।

Compare with P. 68 58

अत्रोच्यते- स्थिरस्वभावत्वे हि भावस्य उत्तरकालमेवेदं कार्यं न पूर्वकालमिति कुत एतत्? तदभावाच्च कारणमपि उत्तरकार्यकरणस्वभावमित्यपि कुतः? किं कुर्मः? उत्तरकालमेव तस्य जन्मेति चेत्, अस्तु स्थिरत्वे तदनुपपद्य-

मानमस्थिरतामादिशत् । स्थिरत्वेऽप्येष एव स्वभावः
[५२] तस्य यदुत्तरक्षण एव करोति इति चेत् । उत्तेदानीं
प्रमाणप्रत्याशा धूमादग्निरित्यत्रापि स्वभाव एव
अस्य यदिदानीमत्र निरग्निरपि धूम इति
वक्तुं शक्यत्वात् । तस्मात् प्रमाणसिद्धे स्वभावा-
वलम्बनं, न तु स्वभावावलम्बनेन प्रमाणव्यालोपः ।
तस्माद् यदि कारणस्य उत्तरकार्यकारकत्वमभ्युपगम्य
कार्यस्य प्रथमक्षणभावित्वमासज्यते स्यात् स्ववचनवि-
रोधः । यदा तु कारणस्य स्थिरत्वे कार्यस्य उत्तरकाल-
त्वमेव असंगतम् । अतः कारणस्यापि उत्तरकार्य-
जनकत्वं वस्तुतोऽसम्भवि तदा प्रसंगसाधनमिदम् ।
जननव्यवहारगोचरत्वं हि जननेन व्याप्तमिति प्रसा-
धितम् । उत्तरकार्यजननव्यवहारगोचरत्वं च त्वदभ्युप-
गमात् प्रथमकार्यकरणकाल एव घटे धर्मिणि सि-
द्धम् । अतस्तन्मात्रानुबन्धिन उत्तराभिमतस्य कार्यस्य
प्रथमक्षणेऽसम्भवादेव प्रसङ्गः क्रियते । न हि नीलकारके-
ऽपि पीतकारकत्वारोपे पीतसम्भवप्रसंगः स्ववचनविरोधो
नाम । तदेवं शक्तः सहकार्यनपेक्षितत्वात्

जननेन व्याप्तः। अजनयंश्च शक्ताशक्तत्वविरुद्धधर्मा-
ध्यासाद् भिन्न एव। ननु भवतु प्रसंगविपर्ययबला-
देककार्यं प्रति शक्ताशक्तत्वलक्षणविरुद्धधर्माध्यासः।
[43] तथापि न ततो भेदः सिध्यति। तथाहि बीजमंकुरा-
दिकं कुर्वद् यदि येनैव स्वभावेन अंकुरं करोति
तेनैव क्षित्यादिकं तदा क्षित्यादीनामपि अंकुरस्वाभाव्या-
पत्तिः। नानास्वभावत्वेन तु कारकत्वे स्वभावाना-
मन्योन्याभावाव्यभिचारित्वादेकत्र भावाभावौ परस्पर-
विरुद्धौ स्यातामित्येकमपि बीजं भिद्येत। एवं प्रदीपो-
ऽपि तैलक्षयवर्तिदाहादिकं तथा पूर्वरूपमपि उत्तररूप-
रसगन्धादिकमनेकैः स्वभावैः परिकरितं करोति। तेषां च
स्वभावानामन्योन्याभावाव्यभिचाराद् विरुद्धानां
योगे प्रदीपादिकं भिद्येत। न च भिद्यते। तन्न
विरुद्धधर्माध्यासो भेदकः तथा बीजस्य अंकुरं प्रति
कारकत्वं गर्दभादिकं प्रति अकारकत्वमिति कार-
कत्वाकारकत्वे अपि विरुद्धौ धर्मौ। न च तद्योगेऽपि
बीजभेदः। तदेवमेकत्र बीजे शक्ताशक्तत्वादिः विरुद्ध-
धर्माध्यासो न घटादेर्भेदक इति।

अत्र ब्रूमः भवतु तावद् बीजादीनामनेककार्य
कारित्वाद् धर्मभूतानेकस्वभावभेदः, तथापि कः
प्रस्तावो विरुद्धधर्माध्यासस्य? स्वभावानां हि
अन्योन्याभावाव्यभिचारे भेदः प्राप्तावसरः,
[५५] न विरोधः। विरोधस्तु, यद्विधाने यन्निषेधः
यन्निषेधे यद्विधानं तयोरेकत्र धर्मिणि परस्परपरि
हारस्थिततया स्यात्। तदत्रैकः स्वभावः स्वभावेन
विरुद्धो युक्तः भावाभाववत्, न तु स्वभावान्तरेण
घटत्व-वस्तुत्ववत्। एवमंकुरादिकारित्वं
तदकारित्वेन विरुद्धं न पुन[1]र्वस्त्वन्तराकारित्वेन।
प्रत्यक्षव्यापारश्चात्र यथा नानाधर्मैरध्यासितं
भावमभिन्नं व्यवस्थापयति तथा तत्कार्यकारिणं
कार्यान्तराकारिणं च। तद् यदि प्रतियोगित्वा-
भावादन्योन्याभावाव्यभिचारिणावपि स्वभावाव-
विरुद्धौ तत्कारकत्वान्याकारकत्वे वा विषयभेदा-
दविरुद्धे तत् किमायातमेककार्यं प्रति शक्ताशक्त-
त्वयोः परस्परप्रतियोगिनोर्विरुद्धयोर्धर्मयोः।
एतयोः पुनरविरोधे विरोधो नाम दत्तजलांजलिः।

1 °र्वस्त्वन्तरकारित्वेन A।

P/ भवतु तर्ह्येककार्यापेक्षयैव सामर्थ्यासामर्थ्ययोर्विरोधः, केवलं तदेव(को) कार्यं प्रति क्वचिद्देशे शक्ति-देशान्तरे चाऽशक्तिरिति देशभेदादविरुद्धे शक्त्यशक्ती तथैकत्रैव कार्ये कालभेदादपि अविरुद्धे। यथा पूर्वं[1] निःक्रियः स्फटिकः स एव पश्चात् सक्रिय इति चेत्।

[45] उच्यते। न हि वयं परिभाषामात्रादेकत्र कार्ये देशभेदादविरुद्धे शक्त्यशक्ती ब्रूमः, किन्तु विरोधाभावात्। तद्देशकार्यकारित्वं हि तद्देशकार्याकारित्वेन विरुद्धम्। न पुनर्देशान्तरे तत्कार्याकारित्वेन अन्यकार्यकारित्वेन वा। यद्येवं तत्काल-कार्यकारित्वं तत्कालकार्याकारित्वेन विरुद्धम्, न पुनः कालान्तरे तत्कार्याकारित्वेन अन्यकार्यकारित्वेन वा। तत् कथं कालभेदेऽपि विरोध इति चेत्। उच्यते। द्वयोर्हि धर्मयोः एकत्र धर्मिणि अनवस्थिति नियमः परस्परपरिहारस्थितिलक्षणो विरोधः। स च साक्षात् परस्परप्रत्यनीकतया भावाभाववद्वा भवेत् एकस्य [2]वा नियमेन प्रमाणान्तरेण बाधनात् नित्यत्वसत्त्ववद्वा

1 पूर्ववत् B। 2 A omits वा। A seems better.

भवेदिति न कश्चिदर्थभेदः। तदत्र एकधर्मिणि
तत्कालकार्यकारित्वाधारे कालान्तरे तत्कार्याकारित्व-
स्य अन्यकार्यकारित्वस्य वा नियमेन प्रमाणान्तरेण
बाधनाद् विरोधः। तथाहि— यत्रैव धर्मिणि
तत्कालकार्यकारित्वमुपलब्धं न तत्रैव कालान्तरे
तत्कार्याकारित्वमन्यकार्यकारित्वं वा ब्रह्मणाऽपि
उपसंहर्तुं शक्यते येनानयोरविरोधः स्यात्।
[46] क्षणान्तरे कथितप्रसंगविपर्ययहेतूनामवश्यंभावेन
धर्मिभेदप्रसाधनात्। न च प्रत्यभिज्ञानादेकत्व-
सिद्धिः। तत्पौरुषस्य निर्मूलितत्वात्। अत एव
वज्रोऽपि पङ्कुक्षौ निक्षिप्तः, कथमसौ स्फटिको
बराकः कालभेदेन अभेदसाधनाय दृष्टान्तीभवितु-
मर्हति। न चैवं समानकालकार्याणां देशभेदेऽपि
धर्मिभेदो युक्तः भेदप्रसाधकप्रमाणाभावादि-
न्द्रियप्रत्यक्षेण निरस्तविभ्रमाशङ्केन अभेदप्रसाधना-
च्च। इति न कालभेदेऽपि शक्याशक्योर्विरोधः
स्वसमयमात्रादपहस्तयितुं शक्यः। समयप्रमाण-
योरप्रवृत्तेरिति।

तस्मात् सर्वत्र विरुद्धधर्माध्यासासिद्धिरेव भेदसिद्धिः।
विप्रतिपन्नं प्रति तु विरुद्धधर्माध्यासाद् भेदव्यवहारः
साध्यते। ननु तथापि सत्त्वमिदमनैकान्तिक-
मेव असाधारणत्वात् सन्दिग्धव्यतिरेकत्वाद्वा।
यथाहीदं क्रमाक्रमनिवृत्तौ अक्षणिकात् निवृत्तं तथा
सापेक्षत्वानपेक्षत्वयोरेकत्वानेकत्वयोरपि व्यापकयोः
निवृत्तौ क्षणिकादपि। तथा हि— उपसर्पणप्रत्ययेन
देवदत्तकरपल्लवादिना सहचरो बीजक्षणः पूर्वस्मादेव
पुंजात् समर्थो जातोऽनपेक्ष आद्यातिशयस्य जनक
इष्यते। तत्र च[1] समानकुशूलजन्मसु बहुषु बीज-
[47] सन्तानेषु कस्मात्,, किञ्चिदेव बीजं परम्परया अंकुरो-
त्पादनानुगुणमुपजनयति बीजक्षणं नाऽन्ये बीजक्षणा
भिन्नसन्तानान्तःपातिनः। न हि उपसर्पणप्रत्ययात्
प्रागेव तेषां समानासमानसन्तानवर्तिनां बीजक्षणानां
कश्चित् परम्प(स्प)रातिशयः। अथ [2]उपसर्पणात् प्राग्
न ~~[illegible]~~ तत्सन्तान[3]वर्तिनोऽपि जनयन्ति परम्पर-
याऽपि अंकुरोत्पादनानुगुणं बीजक्षणं बीजमात्रजनना-
त् तेषां। कस्यचिदेव बीजक्षणस्य उपसर्पणप्रत्यय-

1 A omits च। 2 A उपसर्पणप्रत्ययात्। 3 A ०नानुकीर्तिनः।

सहभुव आद्यातिशयोत्पादः। हन्त तर्हि यदभावे सति उत्पन्नोऽपि न जनयेदेव। तथा[1] केवलानां व्यभिचारसम्भवादाद्यातिशयोत्पादमंकुरं वा प्रति क्षित्यादीनां परस्परापेक्षाणामेव उत्पादकत्वमकामकेन अपि स्वीकर्तव्यम्। अतो न तावदपेक्षा क्षणिकस्य सम्भविनी। नाऽप्यपेक्षा युज्यते। समसमयक्षणयोः सव्येतरगोविषाणयोरिव उपकार्योपकारकभावायोगादिति नासिद्धः प्रथमो व्यापकाभावः। अपि च अन्त्यो बीजक्षणो ऽनपेक्षो ऽङ्कुरादिकं कुर्वन् यदि येनैव रूपेण अंकुरं करोति तेनैव क्षित्यादिकं तदा क्षित्यादीनामपि अंकुरस्वाभाव्यापत्तिरभिन्नकारणत्वादिति न तावदेकत्वसम्भवः।

[48] ननु रूपान्तरेण करोति। तथाहि-बीजस्यांकुरं प्रति उपादानत्वम्, क्षित्यादिकं तु प्रति सहकारित्वं। यद्येवं सहकारित्वोपादानत्वे किमेकं तत्त्वं नाना वा? एकं चेत् कथं रूपान्तरेण जनकं। नानात्वे त्वनयोर्बीजाद् भेदोऽभेदो वा?

1A तथा च।

भेदे कथं बीजस्य जनकत्वं ताभ्यामेव अंकुरा-
दीनामुत्पत्तेः। अभेदे वा कथं बीजस्य न नानात्वं
भिन्नतादात्म्यात्। एतयोर्वा एकत्वमेकतादात्म्यात्।
यद्युच्येत। क्षित्यादौ जनयितव्ये तदुपादानं पूर्वमेव क्षित्या-
दिबीजस्य रूपान्तरमिति। न तर्हि बीजं तदनपेक्षं क्षि-
त्यादीनां जनकं। तदनपेक्षत्वे तेषामंकुरोद्भेदानुपपत्तेः। न
चाऽनुपकारकाण्यपेक्षन्त इति त्वयैवोक्तम्। न च क्षण-
स्योपकारसम्भवोऽन्यत्र जननात् तस्याऽभेद्यत्वादित्यनेक-
त्वमपि नास्तीति द्वितीयोऽपि व्यापकाभावो न(ना)सिद्धः। तस्माद-
साधारणानैकान्तिकत्वं गन्धवत्त्ववदिति।

यदि मन्येत अनुपकारका अपि भवन्ति सहकारिणोऽपे-
क्षणीयाश्च कार्येण अनुविहितभावाभावात् सहकरणाच्च।
नन्वनेन क्रमेण अक्षणिकोऽपि भावः अनुपकारकानपि
सहकारिणः क्रमवतः क्रमवत्कार्येण अनुकृतान्वयव्यतिरेका-
नपेक्षिष्यते। करिष्यते च क्रमवत्सहकारिवशः क्रमेण
[49] कार्याणीति व्यापकानुपलब्धेरसिद्धेः सन्दिग्धव्यतिरेक-
मनैकान्तिकं सत्त्वं क्षणिकत्वसिद्धाविति।

अत्र ब्रूमः। कीदृशं पुनरपेक्षार्थमादाय क्षणिके[1]

1 क्षणिकत्वे A।

~~सापेक्षानपेक्षत्वनिवृत्तिरुच्यते । किं सहकारिणमपेक्षते~~
इति सहकारिणास्योपकारः कर्तव्यः ।

अथ पूर्वावस्थितस्यैव बीजादेः सहकारिणा सह
सम्भूयकरणं । अत्र 'पूर्वावस्थितस्य' इत्यनपेक्षमिलि-
तावस्थस्य करणमात्रमपेक्षार्थः । अत्र प्रथमपक्षस्य
[1]असम्भवादनपेक्षैव क्षणिकस्य कथमुभयव्यावृत्तिः ।
यद्यनपेक्षः क्षणिकः किमिति उपसर्पणप्रत्ययाभावेऽपि
न करोति । करोत्येव यदि स्यात् । स्वयमसम्भवी तु
कथं करोतु । अथ ~~तद्~~ तद्वा तादृश्या आसीदिति न
कश्चिद्विशेषः । ततस्तादृक्स्वभाव[2]सम्भवेऽप्यकारणं सह-
कारिणि निरपेक्षतां न क्षमते इति चेत्, [3]असम्बद्धमे-
तत् । वर्णसंस्थानसाम्येऽपि अकर्तुस्तत्स्वभावताया
विरहात् । स च आद्यातिशयजनकत्वलक्षणः स्वभाव-
विशेषो न समानासमानसन्तानवर्तिषु बीजक्षणेषु
सर्वेष्वेव सम्भवी किन्तु केषुचिदेव कर्मकरकरपल्लवैः-
[50] सहचरेषु । नन्वेकत्र क्षेत्रे निष्पत्तिलवनादिपूर्वकमानी-
यैकत्र कुशूले क्षिप्तानि सर्वाण्येव बीजानि साधारण-
रूपाण्येव प्रतीयन्ते । तत् कुतस्त्योऽयमेकबीज-

1 असद्भावात् । 2 A omits सम्भवे । 3 असम्बद्धमेतद् ।

संम्भवी विशेषोऽन्येषामिति चेत् ।

उच्यते । कारणं खलु सर्वत्र कार्ये द्विविधम् – दृष्टमदृष्टं च सर्वास्तिकप्रसिद्धमेतत् । ततः प्रत्यक्ष-परोक्ष-प्रत्यय सहकारिसाकल्यमसर्वविदां प्रत्यक्षतो न शक्यं प्रतिपत्तुम् । ततो भवेदपि कारणसामग्रीशक्तिभेदात् तादृशः स्वभावभेदः केषांचिदेव बीजक्षणानां येन त एव बीजक्षणा आद्यातिशयमंकुरं वा परम्परया जनयेयुः, नान्ये बीजक्षणाः । ननु येषु उपसर्पणप्रत्ययेषु सहचरेषु स्वकारणशक्तिभेदादाद्यातिशयजनकत्वलक्षणो विशेषः सम्भाव्यते स तत्रावश्यमस्तीति कुतो लभ्यमिति चेत् । अंकुरोत्पादादनुमितादाद्यातिशयलक्षणात् कार्यादिति ब्रूमः । कारणानुपलब्धेस्तर्हि तदभाव एव भविष्यतीति चेत् । न । दृश्यादृश्यसमुदायस्य कारणस्यादर्शनेऽपि अभाव(वा)सिद्धेः कारणानुपलब्धेः सन्दिग्धासिद्धत्वात् । तदयमर्थः –

न भिदा(?) पाणिस्पर्शवतः क्षणस्य न भेदभिन्नान्यकालक्षणाद्
भेदो वेति मतद्वये मतिबलं यस्यास्त्यसौ जित्वरः ।

[51] तत्रैकस्य बलं निमित्तविरहः कार्यागमन्यस्य वा
सामग्री तु न सर्वथैक्षणसहा कार्यं तु मानानुगम् । इति

(क्षै)
तदेवं नोपकारोऽपेक्षार्थ इत्यनपेक्षैव क्षणिकस्य सहकारिषु नोभयव्यावृत्तिः। अथ सम्भूयकरणमपेक्षार्थः तदा यदि पूर्वस्थितस्येति विशेषणापेक्षा तदा क्षणिकस्य ~~नैवं~~ नैवं कदाचिदित्यनपेक्षैव अक्षीणा। अथ पूर्वस्थितस्येति अनपेक्ष्य मिलितावस्थस्यैव[1] करणमपेक्षार्थः तदा सापेक्षतैव नाऽनपेक्षा। तथा च नोभयव्यावृत्तिरित्यसिद्धः प्रथमो व्यापकानुपलम्भः। तथैकत्वानेकत्वयोरपि व्यापकयोः क्षणिकाद्व्यावृत्तिरसिद्धा। तत्तद्व्यावृत्तिभेदमाश्रित्य उपादानत्वादिकाल्पनिकस्वभावभेदेऽपि परमार्थत एकेनैव स्वरूपेण अनेककार्यनिष्पादनादुभयव्यावृत्तेरभावात्। यच्च बीजस्य एकेनैव स्वभावेन कारकत्वे क्षित्यादीनामंकुरस्वाभाव्यापत्तिरन्यथा कारणाभेदेऽपि[2] कार्यभेदेऽपि कार्यस्याऽहेतुकत्वप्रसंगादित्युक्तं तदसंगतम्। कारणैकत्वस्य कार्यभेदस्य च परनेन्द्रियप्रत्यक्षेण साधनात्। एककारणजन्यत्वैककार्यत्वयोः व्याप्तेः प्रतिहतत्वात्। प्रसंगस्य अनुपपत्त्वात्। यच्च कारणा-

1 ०वस्थितस्यैव। 2 A omits अपि।

[52] भेदे, कार्यभेद इत्युक्तं तत्र सामग्रीस्वरूपं
कारणमभिप्रेतं सामग्रीसजातीयत्वे न कार्यविजाती-
यतेत्यर्थः । न पुनः सामग्रीमध्यगतेनैकेन अनेकं कार्यं
[1]न कर्तव्यं नाम । एकस्मादनेकोत्पत्तेः प्रत्यक्षसिद्धत्वा-
त् । न चैवं प्रत्यभिज्ञानात् कालभेदेऽप्यभेदसिद्धिरि-
त्युक्तप्रायम् । न चेन्द्रियप्रत्यक्षं भिन्नदेशं सप्रतिघं
दृश्यमर्थद्वयमेकमेवोपलम्भयतीति क्वचिदुपलब्धं येन
तत्रापि भेदशंका स्यात् । शंकायां वा परं प्रत्यक्षस्या-
प्यपलापे सर्वप्रमाणोच्छेदप्रसंगात्[2] । [3]नापि सन्दि-
ग्धव्यतिरेकः । क्षित्यादेर्द्रव्यान्तरस्य बीजस्वभाव-
त्वेन अस्माभिरस्वीकृतत्वात् अनुपकारिण्य-
पेक्षायाः प्रत्याख्यानात् । व्यापकानुपलम्भस्याऽसिद्धत्वायोगात् । तदेतौ द्वावपि व्यापकानुपलम्भावसिद्धौ
न क्षणिकात् सत्त्वं[4] निवर्तेत इति नायमसाधारणो
हेतुः । अपि च विद्यमानो भावः साध्येतरयोरनिश्चि-
तान्वयव्यतिरेको गन्धवत्त्वादिवदसाधारणो युक्तः ।
प्रकृते व्यापकानुपलम्भाच्च सर्वथा अर्थक्रियैव असती
उभाभ्यां वादिभ्यामुभयस्माद्विनिवर्तितत्वेन निरा-
श्रयत्वात् कथमसाधारणानैकान्तिकी भविष्यति

1 A omits न | 3 नापि सत्त्वहेतोः सन्दिग्धव्यतिरेकत्वम् A |
2 A adds इति | 4 निवर्तयते A |

[53] अलं बहुप्रलापिनि, निर्बन्धेन। तदेवं शक्तस्य क्षेपायोगात् समर्थव्यवहारगोचरत्वं जननेन व्याप्तमिति प्रसंगविपर्यययोः सत्त्वे हेतोरपि नानैकान्तिकत्वमतः क्षणभंगसिद्धिरिति स्थितम्॥

इति साधर्म्यदृष्टान्तेऽन्वयरूपव्याप्त्या
क्षणभङ्गसिद्धिः समाप्ता॥

कृतिरियं महापण्डितरत्नकीर्तिपादानामिति॥卐

卐 A has the following post colophon statement

ग्रन्थप्रमाणम्। ३५०। अभियुक्तकत्रिलोचनदत्तेन प्रकरणमिदं लिखितमात्मार्थं परार्थं चेति।

मालेगांव ·
ज्येष्ठ पूर्णिमा ·
सं· २००७.

## [५४] क्षणभङ्गसिद्धिः व्यतिरेकात्मिका.

व्यतिरेकात्मिका व्याप्तिराक्षिप्तान्वयरूपिणी ।
वैधर्म्यवति दृष्टान्ते सत्त्वहेतोरिहोच्यते ॥

यत् सत् तत् क्षणिकं, यथा घटः, सन्तश्चामी विवादास्पदीभूताः पदार्था इति स्वभावो हेतुः । न तावदस्य असिद्धिः सम्भवति, यथायोगं प्रत्यक्षानुमानप्रमाणप्रतीते धर्मिणि सत्त्वशब्देन अभिप्रेतस्य अर्थक्रियाकारित्वलक्षणस्य साधनस्य प्रमाणसमधिगतत्वात् । न च विरुद्धानैकान्तिकते । व्यापकानुपलम्भात्मना विपर्ययबाधकप्रमाणेन व्याप्तेः प्रसाधनात् । व्यापकं च अर्थक्रियाकारित्वस्य क्रमाक्रमिकार्यविषयत्वमेव । न पुनः कारणगतौ कार्यगतौ वा क्रमाक्रमावस्य व्यापकौ । कृत्वा करणलक्षणस्य क्रमस्य क्षणिकेऽसम्भवात् । कार्यगताभ्यां क्रमाक्रमाभ्यां कारणशक्तेर्व्याप्त्ययोगात् । तस्मात् कारणगतया क्रमाक्रमिकार्यविषयतया व्याप्यमाना कारणशक्तिः क्रमाक्रमव्याप्तेत्युच्यते, विषयेण विषयिनिर्देशात् व्यवहारलाघवार्थम् ।

[55] ततश्च यद्यपि सर्वत्र क्रमाक्रमौ, सत्त्वस्य व्यापका-
वित्यादि उच्यते तथापि क्रमाक्रमिकार्यविषयत्व-
मेव व्यापकं बोद्धव्यम्। ननु यदैकमेव कार्यमंकुरादि
उत्पद्यते तदा कथं कार्यगतक्रमाक्रमव्यवस्थेति चेत्।
उच्यते यद्यपि एकमेव कार्यं भिन्नकाल-
कार्यमपेक्ष्य क्रमः तदभावाच्चाऽक्रमः तत्कारित्व-
मेव क्रमाक्रमकारित्वम्। तथापि अपेक्षणीयविषय-
भेदात् क्रमाक्रमयोरसांकर्यमेव पितृपुत्रत्ववत्।
कः पुनरसौ व्याप्तिप्रसाधको व्यापकानुपलम्भ इति
चेत्। उच्यते। यस्य क्रमाक्रमिकार्यविषयत्वं नास्ति
न तत् शक्तम्, यथा शशविषाणम्। नास्ति
च नित्याभिमतस्य भावस्य क्रमाक्रमिकार्यविषयत्व-
मिति व्यापकानुपलम्भः। न तावदयमसिद्धो वक्त-
व्यः नित्यस्य धर्मिणः क्रमाक्रमिकार्यविषयत्वेन
व्यापकेन सह विरोधसद्भावात्। तथाहि पूर्वापर-
कालयोरेकत्वे नित्यत्वम्, क्षणद्वयेऽपि भेदे क्रमा-
क्रमित्त्वम्। ततश्च नित्यत्वं क्रमाक्रमित्वं चेति
अभिन्नत्वं भिन्नत्वं चेत्युक्तं भवति। एतयोश्च परस्प-

रपरिहारस्थितिलक्षणतया विरोधः। तत् कथं नित्ये
क्रमाक्रमसम्भवः। नापि विरुद्धः, सपक्षे भावात्।
[56] न चाऽनैकान्तिकः, क्रमाक्रमाभावस्य अर्थक्रियासा-
मर्थ्याभावेन व्याप्तत्वात्। तथा हि- न तावत् क्रमा-
क्रमाभ्यामन्यः प्रकारोऽस्ति, येन अर्थक्रियासम्भावनायां
क्रमाक्रमाभ्यामर्थक्रियाव्याप्तिर्न स्यात्। तस्मादर्थक्रि-
यामात्रानुबद्धतया तयोरन्यतरप्रकारस्य उभयोरभा-
वे चाऽभावादर्थक्रियामात्रस्येति ताभ्यां तस्य व्याप्तिसि-
द्धिः। पक्षीकृते च तयोरभावेन अर्थक्रियाशक्त्यभाव-
सिद्धौ कथमनेकान्तः। न हि व्याप्यव्यापकयोर्व्याप्यव्याप-
कभावसिद्धिमुक्त्वा व्याप्याभावेन व्यापकाभावस्य
व्याप्तिसिद्धौ उपायान्तरमस्तीति निरवद्यो व्यापकानुप-
लम्भः सत्त्वस्य क्षणिकत्वेन व्याप्तिं साधयत्येव।

ननु व्यापकानुलम्भतः सत्त्वस्य कथं स्वसाध्यप्रति-
बन्धसिद्धिः, अस्याऽप्यनेकदोषदुष्टत्वात्। तथा हि- न ताव-
दयं प्रसंगो हेतुः, साध्यधर्मिणि प्रमाणसिद्धत्वात्
पराभ्युपगमसिद्धत्वाभावात् विपर्ययपर्यवसानाभावाच्च
अथ स्वतन्त्रः तदा आश्रयासिद्धः, अक्षणिकस्याश्रय-

स्याऽसम्भवादप्रतीतत्वाद्वा। प्रतीतिर्हि प्रत्यक्षेण
अनुमानेन विकल्पमात्रेण वा स्यात्। प्रथमपक्षद्वये
साक्षात् पारम्पर्येण वा स्वप्रतीतिलक्षणार्थकारित्वे
मौलः साधारणो हेतुः व्यापकानुपलम्भश्च स्वरूपासिद्धः
[57] स्यात्। अर्थक्रियाकारित्वे क्रमाक्रमयोरन्यतरस्या-
व्ययम्भावात्। अन्तिमपक्षे तु न कश्चिद्धेतुरनाश्रयः
स्यात्, विकल्पमात्रसिद्धस्य धर्मिणः सर्वत्र सुल-
भत्वात्। अपि च तत् कल्पनाज्ञानं प्रत्यक्षपृष्ठभावि
वा स्यात् लिंगजन्म वा संस्कारजं वा सन्दिग्धव-
स्तुकं वा अवस्तुकं वा। तत्र आद्यपक्षद्वये अक्ष-
णिकस्य सत्तैव अव्याहृता कथं बाधकावतारः?
तृतीये तु न सर्वदाऽक्षणिकसत्तानिषेधः, तदर्पितसं-
स्काराभावे तत्स्मरणायोगात्। चतुर्थे तु सन्दिग्धाश्र-
यत्वं हेतुदोषः। पञ्चमे च तद्विषयस्य अभावो न
तावत् प्रत्यक्षतः सिध्यति, अक्षणिकात्मनः
सर्वदैव त्वन्मतेऽप्रत्यक्षत्वात्। न चाऽनुमानतस्तद-
भावः प्रतिबद्धलिंगानुपलम्भादित्याश्रयासिद्धिस्ता-
वदुद्धता। एवं दृष्टान्तोऽपि प्रतिहन्तव्यः।

स्वरूपासिद्धोऽप्ययं हेतुः, स्थिरस्यापि क्रमाक्रमि
सहकार्यपेक्षया क्रमाक्रमाभ्यामर्थक्रियोपपत्तेः। नापि
क्रमयौगपद्यपक्षोक्तदोषप्रसंगः। तथाहि क्रमिसहकार्य-
पेक्षया क्रमिकार्यकारित्वं तावदविरुद्धम्।

Compare with P. 36 तथा च शङ्करस्य संक्षिप्तोऽयमभिप्रायः। सहका-
रिसाकल्यं हि सामर्थ्यम्, तद्वैकल्यं चाऽसामर्थ्यम्। न
च तयोराविर्भावतिरोभावाभ्यां तद्वतः काचित् क्षतिः,
[58] तस्य, ताभ्यामन्यत्वात्। तत् कथं सहकारिणोऽ-
नपेक्ष्य कार्यकरणप्रसङ्गः इति।

Compare with P39. त्रिलोचनस्याऽप्ययं संक्षिप्तार्थः। कार्यमेव हि सहका-
रिणमपेक्षते, न कार्योत्पत्तिहेतुः। यस्माद् द्विविधं
सामर्थ्यं निजमागन्तुकं च सहकार्यन्तरम्। ततोऽक्ष-
णिकस्यापि क्रमवत्सहकारिनानात्वादपि क्रमवत्कार्य-
नानात्वोपपत्तेरशक्यं भावानां प्रतिक्षणमन्यान्यत्वमुप-
पादयितुमिति।

Compare with 41 न्यायभूषणोऽपि लपति। प्रथमकार्योत्पादनकाले
हि उत्तरकार्योत्पादनस्वभावः। अतः प्रथमकाल एवा-
शेषाणि कार्याणि कुर्यादिति चेत् तदिदं माता मे

वन्ध्या इत्यादिवत् स्ववचनविरोधादयुक्तम् । यो हि उत्तरकार्यजननस्वभावः स कथमादौ तत् कार्यं कुर्यात् । न तर्हि तत्कार्यकरणस्वभावः । न हि नीलोत्पादनस्वभावः पीतादिकमपि करोतीति ।

वाचस्पतिरपि पठति । नन्वयमक्षणिकोऽपि स्वरूपेण कार्यं जनयति । तच्चास्य स्वरूपं तृतीयादिष्विव क्षणेषु द्वितीयेऽपि क्षणे सदिति तदापि जनयेत् अकुर्वन् वा तृतीयादिष्वपि न कुर्वीत, तस्य तादवस्थ्यात् । अतादवस्थ्ये वा तदेवास्य क्षणिकत्वम् ।

[59] Compare with P. 37 अत्रोच्यते— सत्यं स्वरूपेण कार्यं जनयति न तु तेनैव । सहकारिसहितादेव ततः कार्योत्पत्तिदर्शनात् । तस्मात् व्याप्तिवत् कार्यकारणभावोऽपि एकत्र अन्ययोगव्यवच्छेदेन अन्यत्र अयोगव्यवच्छेदेनावबोद्धव्यः, तथैव लौकिकपरीक्षकाणां सम्प्रतिपत्तेरिति न क्रमिकार्यकारित्वपक्षोक्तदोषावसरः ।

नाऽप्यक्षणिके यौगपद्यपक्षोक्तदोषावकाशः । ये हि कार्यमुत्पादयितवन्तः द्रव्यविशेषाः तेषां व्यापारस्य नियतकार्योत्पादनसमर्थस्य निष्पादिते कार्येऽनु-

(तत्वादू?)
(त्वावू?)

Compare with P. 69.

वर्तमानेष्वपि तेषु द्रव्येषु निवृत्तार्थादूना सामग्री जायते। तत् कथं निष्पादितं निष्पादयिष्यति। न हि दण्डादयः स्वभावेनैव कर्तारो येन अमी निष्पत्तेरारभ्य कार्यं विदध्युः। किन्तर्हि! व्यापारावेशिनः। न चेयता स्वरूपेण न कर्तारः स्वरूपकारकत्वनिर्वाहपरतया व्यापारसमावेशादिति।

किञ्च, क्रमाक्रमाभावश्च भविष्यति न च सत्त्वाभाव इति सन्दिग्धव्यतिरेकोऽप्ययं व्यापकानुपलम्भः न हि क्रमाक्रमाभ्यामन्यप्रकारस्याऽभावः सिद्धः; विशेषनिषेधस्य शेषाभ्यनुज्ञाविषयत्वात्। किञ्च, प्रका-
[60] रान्तरस्य, दृश्यत्वे नात्यन्तनिषेधः। अदृश्यत्वे तु नासत्तानिश्चयो विप्रकर्षिणामिति न क्रमाक्रमाभ्यामर्थक्रियासामर्थ्यस्य व्याप्तिसिद्धिः। अतः सन्दिग्धव्यतिरेकोऽपि व्यापकानुपलम्भः। किञ्च, दृश्यादृश्यसहकारिप्रत्ययसाकल्यवतः क्रमयौगपद्यस्य अत्यन्तपरोक्षत्वात् तेन व्याप्तं सत्त्वमपि परोक्षमेवेति न तावत् प्रतिबन्धः प्रत्यक्षतः सिध्यति। नाऽप्यनुमानतः, तत्प्रतिबद्धलिंगाभावादिति। अपि च

क्रमाक्रमाभ्यामर्थक्रियाकारित्वं व्याप्तमित्यतिसुभाषितम्। यदि क्रमेण व्याप्तं कथमक्रमेण? अथ अक्रमेण न तर्हि क्रमेण। क्रमाक्रमाभ्यां व्याप्तमिति तु ब्रुवता व्याप्तेरेवाभावः प्रदर्शितो भवति। न हि भवति अग्निर्धूमभावाभावाभ्यां व्याप्त इति। अतो व्याप्तेरनैकान्तिकत्वम्। अपि च किमिदं बाधकमक्षणिकानामसत्तां साधयति उतस्वित् अक्षणिकात् सत्त्वस्य व्यतिरेकम्, अथ सत्त्वक्षणिकत्वयोः प्रतिबन्धम्? न पूर्वो विकल्पः, उक्तक्रमेण हेतोराश्रयासिद्धत्वात्। न च द्वितीयः, यतो व्यापकनिवृत्तिसहिता व्याप्यनिवृत्तिर्व्यतिरेकशब्दस्यार्थः। सा च यदि प्रत्यक्षेण प्रतीयते तदा तद्धेतुः स्यादिति सत्त्वमनैकान्तिकम्। व्यापकानुपलम्भः स्वरूपासिद्धः। अथ सा विकल्प्यते तदा पूर्वोक्तक्रमेण पञ्चधा विकल्प्य
[61] विकल्पो दूषणीयः। अत एव न तृतीयोऽपि विकल्पः, व्यतिरेकासिद्धौ सम्बन्धासिद्धेः। किञ्च, न भूतलवदत्राक्षणिको धर्मी दृश्यते।

न च स्वभावानुपलम्भे व्यापकानुलम्भः कस्यचित् दृश्यस्य प्रतिपत्तिमन्तरेण अन्तर्भावयितुं शक्य इति। किञ्च, अस्य अभावधर्मत्वे आश्रयासिद्धत्वमितरेतराश्रयत्वं च। भावधर्मत्वे विरुद्धत्वं च। उभयधर्मत्वे चानैकान्तिकत्वमिति न त्रयीं दोषजातिमतिपतति।

यत् पुनरुक्तमक्षणिकत्वे क्रम-यौगपद्याभ्यामर्थक्रियाविरोधादिति। तत्र विरोधसिद्धिमनुसरता विरोध्यपि प्रतिपत्तव्यः। तत्प्रतीतिनान्तरीयकत्वाद्विरोधसिद्धेः। यथा तुहिन-दहनयोः। सापेक्षध्रुवभावयोश्च। प्रतियोगी चाऽक्षणिकः प्रतीयमानः प्रतीतिकारित्वात् सन्नेव स्यात् अजनकस्य अप्रमेयत्वात्। संवृतिसिद्धेन अक्षणिकत्वेन विरोधसिद्धिरिति चेत्। संवृतिसिद्धमपि वास्तवं काल्पनिकं वा स्यात्? यदि वास्तवं कथं तस्याऽसत्त्वम्? कथं चाऽर्थक्रियाविरोधः? अर्थक्रियां कुर्वद्धि वास्तवमुच्यते।

अथ काल्पनिकं तत्र किं विरोधो वास्तवः काल्पनिको वा? न तावद् वास्तवः कल्पितविरोधिविरोधत्वात् वन्ध्यापुत्रविरोधवत्। अथ विरो-

[62] योऽपि काल्पनिकः न तर्हि सत्वस्य व्यतिरेकः
पारमार्थिक इति क्षणभङ्गो दत्तजलाञ्जलिरिति।
अयमेव चोद्यप्रबन्धोऽस्मद्गुरुभिः संगृहीतः

Compare with P. 76

"नित्यं नास्ति न वा प्रतीतिविषयस्तेनाश्रयासिद्धता
हेतोः स्वानुभवस्य चाऽव्यतिरतः सिद्धः सपक्षोऽपि च।
शून्यश्च द्वितीयेन सिध्यति न चाऽसत्तापि सत्ता यथा
नो नित्येन विरोधसिद्धिरसता शक्या क्रमादेरपि",
इति।

अत्रोच्यते— इह वस्तुन्यपि धर्मधर्मिव्यवहारो दृष्टः, यथा गवि गोत्वम्, पटे शुक्लत्वम्, तुरगे गमनमित्यादि। अवस्तुन्यपि धर्मधर्मिव्यवहारो दृष्टो यथा शशविषाणे तीक्ष्णत्वाभावो वन्ध्यापुत्रे वक्तृत्वाभावो गगनारविन्दे गन्धाभाव इत्यादि। तत्र अवस्तुनि धर्मित्वं नास्तीति किं वस्तुधर्मेण धर्मित्वं नास्ति आहोस्विदवस्तुधर्मेणापि? प्रथमपक्षे सिद्धसाधनम्। द्वितीयपक्षे तु स्ववचनविरोधः। यदाहुर्गुरवः —

Compare with P. 76

धर्मस्य कस्यचिदवस्तुनि मानसिद्धा
बाधाविधिव्यवहृतिः किमिहास्ति नो वा।
क्वाप्यस्ति चेत् कथमियन्ति न दूषणानि
नास्त्येव चेत् स्ववचनप्रतिरोधसिद्धिः॥

अवस्तुनो धर्मित्वस्वीकारपूर्वकत्वस्य व्यापकस्याऽ-
[63] भावे, आश्रयासिद्धिदूषणस्याऽनुपन्यासप्रसंग इत्य-
र्थः। [1]येनैव हि वचनेन अवस्तुनो धर्मित्वाभावेन
धर्मेण धर्मित्वमभ्युपगतं परस्तु प्रतिषिध्यत इति
व्यक्तमिदमीश्वरचेष्टितम्। तथाहि अवस्तुनो धर्मित्वं
नास्तीति वचनेन धर्मित्वाभावः किमवस्तु(नि) विधीयते
अन्यत्र वा न वा क्वचिदपीति त्रयः पक्षाः। प्रथम-
पक्षेऽवस्तुनो न धर्मित्वनिषेधः धर्मित्वाभावस्य
धर्मस्य तत्रैव विधानात्। द्वितीयेऽवस्तुनि कि-
मायातम्? अन्यत्र धर्मित्वाभावविधानात्।
तृतीयस्तु पक्षो व्यर्थ एव निराश्रयत्वात् इति
कथमवस्तुनो धर्मित्वनिषेधः। तस्माद्यथा प्रमाणो-

1 A adds ~~[illegible]~~ धर्मित्वं प्र××××नो। A has lost about ten letters. The reading of B is evidently wrong. The sentence may be thus emended- येनैव हि वचनेनाऽवस्तुनो धर्मित्वं प्राप्तं तेनैव वचनेन अवस्तुनो धर्मित्वाभावेन धर्मेण अवस्तुनो धर्मित्वमभ्युपगतम्।

पन्यासः प्रमेयस्वीकारपूर्वकत्वेन व्याप्तः। वाचक-
शब्दोपन्यासः वा वाच्यस्वीकारपूर्वकत्वेन व्याप्तः।
तथाऽवस्तुनो धर्मित्वं नास्तीति वचनोपन्यासोऽव-
स्तुनो धर्मित्वस्वीकारपूर्वकत्वेन व्याप्तः। अन्यथा
तद्वचनोपन्यासस्य व्यर्थत्वात्। तद्यदि वचनोपन्या-
[६५] सो व्याप्यधर्मः तदाऽवस्तुनो धर्मित्वस्वीकारो-
ऽपि व्यापकधर्मो दुर्वारः। अथ न व्यापकधर्मः
तदा व्याप्यस्यापि वचनोपन्यासस्याऽसम्भव इति मूकतैव
अत्र बलादायातेति कथं न स्ववचनविरोधसिद्धिः।
न हि अब्रुवन् परं बोधयितुमीशः। ब्रुवन् वा
दोषमिमं परिहर्तुमिति महति सङ्कटे प्रवेशः।
अवस्तुप्रस्तावे सहृदयाणां मूकतैव युज्यते
इति चेत् अहो महद् वैदग्ध्यम्। अवस्तुप्रस्ता-
वे स्वयमेव यथाशक्ति वल्गित्वा भग्नो मूकतैव
न्यायप्राप्तेति परिभाषया निःसर्तुमिच्छति। न
चाऽवस्तुप्रस्तावो राजदण्डेन विना चरणमर्द्दना-
दिनानिष्टिमात्रेण वा प्रतिषेद्धुं शक्यते। ततश्च
अत्रापि क्रमाक्रमाभावस्य साधनत्वे सत्त्वा-

~~भावस्य च साध्यत्वे सन्दिग्धवस्तुभावस्य अवस्त्वा~~
त्मनो वाऽक्षणिकस्य धर्मित्वं केन प्रतिहन्यते।
त्रिविधो हि धर्मो दृष्टः कश्चिद्वस्तुनियतो नीलादि
कश्चिदवस्तुनियतो यथा सर्वोपाख्याविरहः, कश्चि-
दुभयसाधारणः यथानुपलब्धिमात्रम्। तत्र वस्तु-
धर्मेण अवस्तुनो धर्मित्वनिषेध इति युक्तं न त्व-
वस्तुधर्मेण। वस्त्ववस्तुधर्मेण वा। स्ववचनस्यानुप-
1 A adds / अपि न्यासप्रसंगादित्यक्षणिकस्याभावे सन्देहे[1] वाऽवस्तु-
[65] धर्मेण धर्मित्वमव्याहतमिति नायमाश्रयासिद्धो
व्यापकानुपलम्भः।

अक्षणिकाप्रतीतावयमाश्रयासिद्धो हेतुरिति तु युक्त-
मुक्तम्। तदप्रतीतौ तद्व्यवहारायोगात्। केवलमसौ
व्यवहारांगभूता प्रतीतिर्वस्त्ववस्तुनोरेकरूपा
न भवति साक्षात् पारम्पर्येण वस्तुसामर्थ्य-
भाविनी हि वस्तुप्रतीतिः। यथा प्रत्यक्षमनुमानं
प्रत्यक्षपृष्ठभावी च विकल्पः। अवस्तुनस्तु सामर्थ्या-
भावात् विकल्पमात्रमेव प्रतीतिः। वस्तुनो हि वस्तु-
बलभाविनी प्रतीतिर्यथा साक्षात् प्रत्यक्षं परम्परया
तत्पृष्ठभावी विकल्पोऽनुमानं च। अवस्तुनस्तु न

वस्तुबलभाविनी प्रतीतिस्तत्कारकत्वेन अवस्तुत्वहानिप्रसंगात्। तस्माद् विकल्पमात्रमेव अवस्तुनः प्रतीतिः। न हि अभावः कश्चिद् विग्रहवान् यः साक्षात्कर्तव्यः अपि तु व्यवहर्तव्यः। स च व्यवहारो विकल्पादपि सिध्यत्येव। अन्यथा सर्वजनप्रसिद्धोऽवस्तुव्यवहारो न स्यात्। इष्यते च तद्धर्मित्वप्रतिषेधेन अनुबन्धादित्यकामकेनापि विकल्पमात्रसिद्धोऽक्षणिकः स्वीकर्तव्य इति नायमप्रतीतत्वादप्याश्रयसिद्धो हेतुर्वक्तव्यः। ततश्च अक्षणिकस्य विकल्पमात्रसिद्धत्वे यदुक्तं
[88] न कश्चिद्धेतुरनाश्रयः स्याद् विकल्पमात्रसिद्धस्य धर्मिणः सर्वत्र सुलभत्वादिति तदसंगतम्। विकल्पमात्रसिद्धस्य धर्मिणः सर्वत्र सम्भवेऽपि वस्तुधर्मेण धर्मित्वायोगात्। वस्तुधर्महेतुत्वापेक्षया आश्रयासिद्धस्यापि हेतोः सम्भवात्। यथा आत्मनो विभुत्वसाधनार्थमुपन्यस्तं 'सर्वत्र उपलभ्यमानगुणत्वात्' इति साधनम्। विकल्प-

श्चायं हेतूपन्यासात् पूर्वं सन्दिग्धवस्तुकः,
समर्थिते तु हेताववस्तुक इति ब्रूमः। न चात्र
सन्दिग्धाश्रयत्वं नाम हेतुदोषः। आस्तां तावत्
सन्दिग्धस्यावस्तुनोऽपि विकल्पमात्रसिद्धस्य अव-
स्तुधर्मापेक्षया धर्मित्वप्रसाधनात्। वस्तुधर्महेतु
त्वापेक्षयैव सन्दिग्धाश्रयस्य हेत्वाभासस्य
व्यवस्थापनात्। यथेह निकुञ्जे मयूरः केकायि-
तादिति। अवस्तुकविकल्पविषयस्य असत्त्वं तु
व्यापकानुपलम्भादेव प्रसाधितम्। एवं दृष्टान्त-
स्यापि व्योमादेर्धर्मित्वं विकल्पमात्रेण प्रतीतिश्चा-
वगन्तव्या। तदेवमवस्तुधर्मापेक्षयाऽवस्तुनो धर्मित्वस्य
विकल्पमात्रेण प्रतीतेश्च अपह्नोतुमशक्यत्वान्नाय-
माश्रयासिद्धो हेतुः। न दृष्टान्तक्षतिः।

न चैष स्वरूपासिद्धः। अक्षणिके धर्मिणि
क्रमाक्रमयोर्व्यापकयोरयोगात्। तथा हि यदि तस्य
प्रथमे क्षणे द्वितीयादिक्षणभावि कार्यकरणसामर्थ्यम-
[67] स्ति तदा, प्रथमक्षणभाविकार्यवत् द्वितीयादिक्षण-

~~भाव्यपि कार्यं कुर्यात्, समर्थस्य क्षेपायोगात्।~~
अथ तदा सहकारिसाकल्यलक्षणसामर्थ्यं नास्ति तद्वैकल्यलक्षणस्याऽसामर्थ्यस्य सम्भवात्। न हि भावः स्वरूपेण करोतीति स्वरूपेणैव करोति सहकारिसहितात्स्व ततः कार्योत्पत्तिदर्शनात् इति चेत्। यदा तावदमी मिलिताः सन्तः कार्यं कुर्वते तदा एकार्थकरणलक्षणं सहकारित्वमेवाम-
Compare with P. 38 स्तु को निषेद्धा? मिलितैरेव तु तत्कार्यं कर्तव्यमिति कुतो लभ्यते?। पूर्वापरकालयोरेकस्वभावत्वाद् भावस्य सर्वदा जननाजननयोरन्यतरनियमप्रसंगस्य दुर्वारत्वात्। तस्मात् सामग्री जनिका नैकं जनकमिति स्थिरवादिनां मनोराज्यस्यापि अविषयः।

किं कुर्मः? दृश्यते तावदेवमिति चेत्, दृश्यताम्, किन्तु पूर्वस्थितादेव पश्चात् सामग्रीमध्यप्रविष्टाद् भावात् कार्योत्पत्तिरन्यस्मादेव
[वा] विशिष्टसामग्रीसमुत्पन्नात् क्षणादिति विवादपद-

Vide P. 38.

मेतत्। तच्च (त्र) प्रागपि सम्भवे सर्वदैव कार्यो-
त्पत्तिः न वा कदाचिदपीति विरोधम-
समाधाय 'तत एव कार्योत्पत्तिरिति साध्यानु-
वादमात्रप्रवृत्तः कृपामर्हति।

न च प्रत्यभिज्ञानादेवैकत्वसिद्धिः। तत्पौरु-
षस्य लूनपुनर्जातकेशकुशकदलीस्तम्बादौ
[७४] निर्दलनात्। विस्तरेण च प्रत्यभिज्ञादूषणम-
स्माभिः स्थिरसिद्धिदूषणे प्रतिपादितमिति तत एवा-
वधार्यम्।

Compare with P. 39

ननु कार्यमेव सहकारिणमपेक्षते, न तु कार्योत्प-
हेतुः। यस्माद् द्विविधं सामर्थ्यं निजमागन्तुकं च
सहकार्यन्तरम्। ततोऽक्षणिकस्यापि क्रमवत्सहकारि-
नानात्वादपि क्रमवत्कार्यनानात्वमिति चेत्, भवतु
तावन्निजागन्तुकभेदेन द्विविधं सामर्थ्यम्
तथापि तत् प्रातिस्विकं वस्तुस्वलक्षणं सद्यःक्रि-
याधर्मकमवश्यमभ्युपगन्तव्यम्। तद्यदि प्रागपि,
प्रागपि कार्यप्रसंगः। अथ पश्चादेव, न तदा स्थिरो

भावः।
न च कार्यं सहकारिणोऽपेक्षत इति युक्तम्।
तस्याऽसत्त्वात्। हेतुश्च सन्नपि यदि स्वकार्यं न
करोति, तदा तत्कार्यमेव तन्न स्यात्, स्वातन्त्र्यात्।
Compare with P. 42. यच्चोक्तम्— यो हि उत्तरकार्यजननस्वभावः स
कथमादौ कार्यं कुर्यात्। न तर्हि तत्कार्य-
करणस्वभावः। न हि नीलोत्पादनस्वभावः
पीतादिकमपि करोतीति। तदसंगतम्। स्थिरस्व-
भावत्वे भावस्य उत्तरकालमेवेदं कार्यं न पूर्वका-
लमिति कुत एतत्। तदभावाच्च कारणमपि
उत्तरकार्यकरणस्वभावमित्यपि कुतः। किं कुर्मः
उत्तरकालमेव तस्य जन्मेति चेत्। स्थिरत्वे तद-
[69] नुपपद्यमानमस्थिरतामादिशतु। स्थिरत्वेऽप्येष एव
स्वभावस्तस्य यदुत्तरक्षण एव कार्यं करो-
तीति चेत्। न। प्रमाणबाधिते स्वभावाभ्युपगमा-
योगादिति न तावदक्षणिकस्य क्रमिकार्यकारित्व-
मस्ति। नाऽप्यक्रमिकार्यकारित्वसम्भवः। द्वितीयेऽपि

Compare with p. 59

क्षणे कारकस्वरूपसद्भावे पुनरपि कार्यकरणप्रसं
गात्। कार्ये निष्पन्ने तद्विषयव्यापाराभावादुत्तरा
सामग्री न निष्पादितं निष्पादयेदिति चेत्। न।
सामग्रीसम्भवासम्भवयोरपि सद्यःक्रियाकारित्व-
स्वरूपसंभवे जनकत्वमवार्यमिति प्रागेव प्रतिपादना-
त्। कार्यस्य हि निष्पादितत्वात् पुनः कर्तुमशक्य-
त्वमेव कारणमसमर्थमावेदयति। तदयमक्षणिके
क्रमाक्रमिकार्यकारित्वाभावो न सिद्धः। न च क्रमा-
क्रमाभ्यामपरप्रकारसम्भवो येन ताभ्यामव्याप्तौ
सन्दिग्धव्यतिरेको हेतुः स्यात्। प्रकारान्तरशंकायां
तस्यापि दृश्यादृश्यत्वप्रकारद्वयदूषणेऽपि स्वपक्षेऽप्य
नाश्वासप्रसंगात्। तस्मादन्योन्यव्यवच्छेदस्थितयो-
र्नापरः प्रकारः सम्भवति। स्वरूपाप्रविष्टस्य
वस्तुनोऽवस्तुनो वाऽन्यत्वात्। प्रकारान्तरस्यापि
क्रमस्वरूपाप्रविष्टत्वात्। तथातीन्द्रियस्य सह-
कारिणोऽदृश्यत्वेऽप्ययोगव्यवच्छेदेन दृश्यसहकारि-
सहितस्य दृश्यस्यैव सत्त्वस्य दृश्यक्रमाक्रमाभ्यां

व्याप्तिः प्रत्यक्षादेव सिध्यति। एवं क्रमाक्रमाभ्याम
र्थक्रियाकारित्वं व्याप्तमिति क्रमाक्रमयोरन्योन्यव्य-
वच्छेदेन स्थितत्वादेतत्प्रकारद्वयपरिहारेण अर्थक्रि-
याकारित्वमन्यत्र न गतमित्यर्थः। अत एवैतयोर्वि-
निवृत्तौ निवर्तेत।

त्रिलोचनस्यापि विकल्पत्रये प्रथमदूषणमाश्र-
यासिद्धिदोषपरिहारतो निरस्तम्। द्वितीयं चाऽसं-
गतम्, विकल्पज्ञानेन व्यतिरेकस्य प्रतीतत्वात्।
न ह्यभावः कश्चिद् विग्रहवान् यः साक्षात्क-
र्तव्यः, अपि तु विकल्पाद्धेव व्यवहर्तव्यः। न
ह्यभावस्य विकल्पादन्या प्रतिपत्तिरप्रतिपत्ति-
र्वा सर्वथा उभयथापि तद्व्यवहारहानिप्रसं-
गात्। वैधर्म्यदृष्टान्तस्य हेतुव्यतिरेकस्य च
विकल्पादेव प्रतीतिः। तृतीयमपि दूषणमसं-
गतम् व्यापकानुपलम्भे निर्दोषित्वस्य क्षणि-
कत्वेन व्याप्तेरव्याहतत्वात्।

तदयं व्यापकानुपलम्भोऽक्षणिकस्याऽसत्त्वे

सत्त्वस्य ततो व्यतिरेकं क्षणिकत्वेन व्याप्तिं च साधयत्येकव्यापारात्मत्वात् इति स्थितम्।

ननु व्यापकानुपलब्धिरिति यद्यनुपलब्धिमात्रं तदा न तस्य साध्यबुद्धिजनकत्वमवस्तुत्वात् न चान्योपलब्धिर्व्यापकानुपलब्धिरभिधातुं शक्या
[71] भूतलादिवत्, अन्यस्य कस्यचिदनुपलब्धेरिति चेत् तदसंगतम्। धर्म्युपलब्धेरेव अन्यत्राऽप्यनुपलब्धितया व्यवस्थापनात्। यथा नेह शिंशपा वृक्षाभावादित्यत्र वृक्षापेक्षया केवलप्रदेशस्य धर्मिण उपलब्धिर्दृश्यानुपलब्धिः। शिंशपापेक्षया च केवलप्रदेशस्य धर्मिणः उपलब्धिरेव शिंशपाभावोपलब्धिरिति स्वभावहेतुपर्यवसायिव्यापारो व्यापकानुपलम्भः। तथा हि[1] नित्यस्य धर्मिणो विकल्पबुद्ध्यध्यवसितस्य क्रमिकारित्वाक्रमिकारित्वापेक्षया केवलग्रहणमेव क्रमिकारित्वाक्रमिकारित्वानुपलम्भः अर्थक्रियापेक्षया च केवलप्रतीतिरेव अर्थक्रियावियोगप्रतीतिरिति व्यापकानुपलम्भान्तरादस्य

1 A omits हि।

न कश्चिद्विशेषः।
अध्यवसायापेक्षया च बाह्येऽक्षणिकेऽव-
स्तुनि व्यापकाभावात् व्याप्याभावसिद्धिव्यवहारः।
अध्यवसायश्च समनन्तरप्रत्ययबलायाताकार-
विशेषयोगादगृहीतेऽपि प्रवर्तनशक्तिर्बोद्धव्यः।
ईदृशश्चाऽध्यवसायोऽर्थोऽस्माच्चित्राद्वैतसिद्धौ निर्वा-
हितः। स चाऽविसम्वादी व्यवहारः परिहर्तुमशक्यः
यद् व्यापकशून्यं तद्व्याप्यशून्यमिति। एतस्यैवा-
र्थस्य अनेनापि क्रमेण प्रतिपादनात्। अयं
च न्यायो यथा वस्तुभूते धर्मिणि तथाऽव-
[७२] स्तुभूतेऽपीति को विशेषः? तथा हि एकज्ञा-
(मत्र) नमात्रविकल्प एव। यथा च हरिणशिरसि
तेन एकज्ञानसंसर्गि शृङ्गमुपलब्धम् शशशिर-
स्यपि तेन सह एकज्ञानसंसर्गित्वसम्भावनया
एव शृङ्गं निषिध्यते। तथा नीलादवपरिनि-
ष्ठितनित्यानित्यभावे क्रमाक्रमौ स्वधर्मिणा सार्धं
एकज्ञानसंसर्गिणौ दृष्टौ नित्येऽपि यदि भवतः

नित्यग्राहिणा ज्ञानेन स्वधर्मिणा नित्येन सहैव गृह्येयातामिति सम्भावनया एकज्ञानसंसर्गिद्वारकमेव प्रतिषिध्यते। कथं पुनरेतन्नित्यज्ञाने क्रमाक्रमयोरस्फुरणमिति। यावता क्रमाक्रमक्रोडीकृतमेव नित्यं विकल्पयाम इति चेत्। अत एव बाधकावतारो, विपरीतरूपारोपमन्तरेण तस्य वैयर्थ्यात्। कालान्तरैकरूप[तया] नित्यत्वं क्रमाक्रमौ च क्षणद्वये भिन्नरूपतया। ततो नित्यत्वस्य क्रमाक्रमिकार्यशक्तेश्च परस्परपरिहारस्थितिलक्षणतया दुर्वारो विरोध इति कथं नित्ये क्रमाक्रमयोरन्तर्भावः। अनन्तर्भावाच्च शुद्धनित्यविकल्पेन दूरीकृतक्रमाक्रमसमारोपेण कथमुल्लेखः। ततश्च प्रतियोगिनि नित्येऽपि कल्प्यमाने एकज्ञानसंसर्गिलक्षणप्राप्ते नित्योपलब्धिरेव नित्यविरुद्धस्यानुपलभ्यमानस्य क्रमाक्रमस्याऽनुपलब्धिः। तत एव

[73] वार्थक्रियाशक्तेरनुपलब्धेः। तस्माद् व्यापकविवेकिधर्म्युपलब्धितया न व्यापकानुपलम्भान्तरादस्य विशेषः।

ननु एतदवस्तुधर्मिकोपयोगि[1] क(व)स्त्वधिष्ठानत्वात् प्रमाणव्यवस्थाया इति चेत्। किमिदं वस्त्वधिष्ठानत्वं

1 (धर्मि को पयोगि, वस्त्वधिष्ठानत्वात्) ???

~~नाम। किं परम्परयापि वस्तुनः सकाशादागतत्वम् अथ~~
वस्तुनि केनचिदाकारेण व्यवहारकारणत्वम् वस्तुभूतधर्मिप्रतिबद्धत्वं वा।

यद्याद्यः पक्षः तदा क्रमाक्रमस्य अर्थक्रियायाश्च व्याप्तिग्रहणगोचरवस्तुप्रतिबद्धत्वमपि न क्षीणम्। न च द्वितीयेऽपि पक्षे दोषः सम्भवति। क्षणभङ्गि वस्तुसाधनोपायत्वादस्य। न चान्तिमोऽपि विकल्पः कल्प्यते। तस्यैव नित्यविकल्पस्य वस्तुनो धर्मिभूतस्य क्रमाक्रमवद्ग्राह्यनित्योपादानशून्यत्वेन अर्थक्रियावद्ग्राह्यनित्योपादानशून्यत्वप्रसाधनात्। पर्युदासवृत्त्या बुद्धिस्वभावभूता क्षणिकाकारे वस्तुभूते धर्मिणि प्रतिबद्धत्वसम्भवात्।

अयमेव न्यायो न वक्ता वन्ध्यासुतः चैतन्याभावादित्यादौ योज्यः। एतेन यथा वृक्षाभावादित्याद्यन्तर्भावयितुं शक्यो न तथायमिति त्रिलोचनोऽपि निरस्तः।

[74] न च क्रमाद्यभावः त्रयीं दोषजातिं नातिक्रामति। अभावधर्मत्वेऽपि आश्रयासिद्धिदोषपरिहारात्। यत्तु अनेन प्रमाणान्तराद् नित्यानामसत्त्वसिद्धौ क्रमादि-

~~विरहस्य अभावधर्मत्ता न सिध्यतीत्युक्तम्। तद् बाल~~-
स्यापि दुरभिधानम्। नित्यो हि धर्मी। असत्त्वं साध्य
म्। क्रमिकार्यकारित्वाक्रमिकार्यकारित्वविरहो हेतुः।
अस्य च अभावधर्मत्वं नाम असत्त्वलक्षणस्वसाध्याविना-
भावित्वमुच्यते। तच्च क्रमाक्रमेण सत्त्वस्य व्याप्तिसिद्धौ
सत्त्वस्य व्याप्यस्याभावेन क्रमाक्रमस्य व्यापकस्य
विरहो व्याप्तः सिध्यतीत्यभावधर्मत्वं प्रागेव विध्यो-
र्व्याप्तिसाधकात् प्रत्यक्षादनुमानात्मकाद्वा प्रमाणान्तरात्
सिद्धमिति नेतरेतराश्रयत्वदोषः।

न च सत्तायामिव असत्तायामपि तुल्यप्रसंगो भिन्न-
न्यायत्वात्। वस्तुभूतं हि तत्र साध्यं साधनं च। तयो-
र्धर्म्यपि वस्तुभूत एव युज्यते। →
← वस्तुनस्तु प्रत्यक्षानुमानाभ्यामेव सिद्धिः। तयोरभावे
नियमेन आश्रयासिद्धिरिति युक्तम्। असत्तासाधने त्व-
वस्तुधर्मा हेतुरवस्तुनि विकल्पमात्रसिद्धे धर्मिणि ना-
श्रयासिद्धिदोषेण दूषयितुं शक्यः। तथाऽक्षणिकस्य क्रम-
यौगपद्याभ्यामर्थक्रियाविरोधः सिध्यत्येव।

[75] तथा विकल्पादेव अक्षणिको विरोधी सिद्धः।
विकल्पोल्लिखितश्चास्य स्वभावो नापर इत्यपि व्यव-
हर्तव्यम्। अन्यथा तदनुवादेन क्रमाक्रमादिरहितत्वादि-
निषेधादिकमयुक्तम्। तत्स्वरूपस्याऽनुल्लेखादित्यक्षणिक
शशविषाणादिशब्दानुच्चारणप्रसंगः। अस्ति च। अतो
यथा प्रमाणाभावेऽपि विकल्पसत्त्वस्य वन्ध्यासुतादेः
सौन्दर्यादिनिषेधोऽनुरूपः; तथा विकल्पोपनीतस्यैव
अक्षणिकस्वरूपस्य तत्प्रत्यनीकाकारेण सह विरोध
व्यवस्थायां कीदृशो दोषः स्यात्। यदि चाऽक्षणिका-
नुभवाभावात् विरोधप्रतिषेधः तर्हि वन्ध्यापुत्राद्यननु-
भवादेव सौन्दर्यादिनिषेधो मा भूत्।
नन्वेवं विरोधस्य अपारमार्थिकत्वम्। तद्द्वारेण क्षण-
भङ्गसिद्धिरप्यपारमार्थिकी स्यादिति चेत्। न हि विरोधी
नाम वस्त्वन्तरं किञ्चित् उभयकोटिदत्तपादं सम्बद्धा-
भिधानमिष्यतेऽस्माभिरुपपद्यते वा। येनैकसम्बन्धिनो
वस्तुत्वाभावेऽपारमार्थिकः स्यात्। यथा त्विष्यते तथा
पारमार्थिक एव। विरुद्धाभिमतयोरन्योन्यस्वरूपपरि-

६

हारमात्रं विरोधार्थः। तत्र भावाभावयोः पारमार्थिकमेव
न भावोऽभावरूपमाविशति। नाप्यभावो भावरूपं प्रविश-
(76) तीति योऽयमनयोरसङ्करनियमः स एव, पारमार्थिको
विरोधः। कालान्तरैकरूपतया हि नित्यत्वम्, क्रमाक्रमौ
क्षणद्वयेऽपि भिन्नरूपतया ततो नित्यत्वक्रमाक्रमिकार्यका-
रकत्वयोर्भावाभाववत् विरोधोऽस्त्येव। ननु नित्यत्वक्रम-
यौगपद्यवत्त्वं च विरुद्धौ विधूय नाऽपरो विरोधो नाम।
कस्य वास्तवत्वमिति चेत्। न। न हि धर्मान्तरस्य सम्भ-
वेन विरोधस्य पारमार्थिकत्वं ब्रूमः। किन्तु विरुद्धयोर्ध-
र्मयोः सद्भावे, अन्यथा विरोधनामधर्मान्तरसम्भवेऽपि
यदि न विरुद्धौ धर्मौ क्व पारमार्थिकविरोधसद्भावः। विरु-
द्धौ च धर्मौ, तावतैव तात्त्विको विरोधव्यवहारः। किमप-
रेण प्रतिज्ञामात्रसिद्धेन विरोधनाम्ना वस्त्वन्तरेण। तदयं
पूर्वपक्षसंक्षेपः। —

Compare with P. 62

नित्यं नास्ति न वा प्रतीतिविषयस्तेनाश्रयासिद्धता*
हेतोः स्वानुभवस्य च क्षतिरतः सिद्धो न सपक्षोऽपि च।
शून्यश्च द्वितीयेन सिध्यति न वा सत्तापि सत्ता यथा
नो नित्येन विरोधसिद्धिरसता शक्या क्रमादेरपि। इति.

अत्र सिद्धान्तसङ्क्षेपः —

Compare with P. 62. धर्मस्य कस्यचिदवस्तुनि मानसिद्धा

बाधाविधिव्यवहृतिः किमिहास्ति नो वा।

[77] काप्यस्ति चेत् कथमियन्ति न दूषणानि

नास्त्येव चेत् स्ववचनप्रतिरोधसिद्धिः॥ इति

तदेवं नित्यं न क्रमिकार्यकारित्वाक्रमिकार्यकारित्व-

योगि परमार्थः। ततश्च सत्तायुक्तमपि नैव परमार्थतः।

ततश्च क्षणिकाक्षणिकपरिहारेण राश्यन्तराभावादक्षणिका-

(तेन?° तमो) द् विनिवर्तमानमिदं सत्त्वं क्षणिकत्व एव विश्राम्यन्तेन

व्याप्तं सिध्यतीति सत्त्वात् क्षणभङ्गसिद्धिरविरोधिनी॥

प्रकृतेः सर्वधर्माणां यद्बोधान्मुक्तिरिष्यते।

स एव तीर्थनिर्माथी क्षणभङ्गः प्रसाधितः॥

विपक्षे बाधनाद्धेतोः साध्यात्मत्वं प्रसिध्यति।

तत्सिद्धौ द्विविधा व्याप्तिसिद्धिरत्राभिधीयते॥

इति वैधर्म्यदृष्टान्ते व्यतिरेकरूपव्याप्त्या क्षणभङ्ग-

सिद्धिः समाप्ता॥०॥

कृतिरियं महापण्डितरत्नकीर्तिपादानाम्॥

॥ नमः श्रीअन्तरिक्ष पार्श्वनाथाय॥

જ્યેષ્ઠવદ-૧. पण्डिताशोकविरचितम्

[ ७४ ] # अ व य वि नि रा क र ण म्

नमः समन्तभद्राय ॥

अभ्यासातिशयस्तथा न विहितस्तादृक् श्रुतं नार्जितम्
तन्मे चापलमर्थलेशमधुना निर्मातुमीहे यदि ।
एतत् सर्वमवेक्ष्य यन्निगदितं तत् पण्डितैर्दृश्यताम्
प्रीणन्त्येव वि - - - हि शिशोः प्रायः पितॄणां मनः ॥

यो विरुद्धधर्माध्यासवान् नासावेकः, यथा घटादिरर्थः, विरुद्धधर्माध्यासवांश्च स्थूलो नीलादिरर्थ इति व्यापकविरुद्धोपलब्धिः। इह दृश्यमानस्थूलो नीलादिरर्थो धर्मी, स चानुभवावसितोऽसति बाधके प्रत्यक्षसिद्धो हेतोराश्रयासिद्धिं निहन्ति। ननु भवद्भिरसन्नेव अवयवी प्रतिज्ञायते, स कथं प्रत्यक्षसिद्धः। नावयविनमिह धर्मिणं प्रतिपन्नाः स्मः, किन्तु प्रतिभासमानस्थूलनीलादिकमर्थम्। न तर्हि विरुद्धधर्मसंसर्गादवयविन एकत्वं निषिद्धं स्यात्। यद्येवं कस्तर्हि भवतोऽवयवी एकोऽनेकावयवसमवेतार्थ इति

[79] ~~चेत् स किं प्रतिभासमानात् स्थूलनीलादेरन्योऽ-~~नन्यो वा। न तावदन्यः, दृश्यत्वेनाभ्युपगमात्। न च प्रतिभासमानस्थूलनीलार्थव्यतिरेकेणाऽपरः प्रतिभाति। अनन्यश्चेत् तस्यैकत्वप्रतिक्षेपे कथमप्रतिषिद्धमेकत्वमवयविनः।

ननु च प्रतिभासमानश्चेदर्थो नावयविरूपो धर्मी किं तर्हि रूपमस्यावशिष्टप्रसिद्धं भविष्यतीति। उच्यते, प्रतिभासमानः स्थूलो नीलाकारः प्रत्यक्षसिद्धं रूपं अवयवित्वानभ्युपगमेऽपि अवशिष्यते। न चैवं मन्तव्यम् न परमाणुसंचयवादिनां स्थूलाकारः कश्चिदर्थोऽस्ति यः प्रसिद्धो धर्मी स्यादिति। अवयव्यनभ्युपगमेऽपि हि निरवयवानेकात्मकः स्थूलोऽर्थोऽभ्युपगम्यमानः केन निषिद्धः। स्यान्मतम्— निरवयवाः परमाणवः कथं प्रत्यक्षे स्थूलेनाकारेण अवभासेरन्, स्थूल-सूक्ष्मयोर्विरोधादिति। तदपि न युक्तम्, परमाणव एव हि परस्परदेशपरिहारेण ~~निरवयवानामु[illegible]~~ उत्पन्नाः परस्परसहिताः अवभासमाना देशवितानवन्तो भासन्ते।

विततदेशत्वं च स्थूलत्वम्। यच्चोक्तम् – स्थूलसूक्ष्मयोर्विरोध इति तत्र किं पररूपदेशपरिहारवती निरवयवानामुत्पत्तिः परस्परसहितानामेकविज्ञानावभासित्वं वा विरुद्धमिति वक्तुमध्यवसितम्। इदं चेद् विरुद्धं स्थूलाकारः किं विरुद्धः। अत एव निरवयवेषु बहुषु एकस्मिन् विज्ञाने
[80] प्रतिभासमानेषु भवन् प्रतिभासकालभावी प्रतिभासधर्मः स्थूलाकारो न तु वास्तवः प्रत्येकमभावात्। प्रतिभासात् प्रागूर्ध्वं वा न तर्हि स्थूलोऽर्थ इति चेत्। न, तदापि प्रतिभासयोग्यतासम्भवात् यदैव हि सञ्चिता भवेयुस्तदैव प्रतिभासयोग्याः परमाणवः। यदा च प्रतिभासयोग्यास्तदा स्थूलाः। यस्त्वाह – निरवयवेषु बहुषु प्रतिभासमानेषु अवश्यमन्तरेणापि प्रतिभासितव्यम्। अन्तरानवभासे परस्परविविक्ता एव नावभासिताः स्युः। विविक्तानवभासे चाणुमात्रकं पिण्डो भवेत्। न चान्तरमवभासमानमुत्पश्यामः। [न] तदयं निरन्तर एक एव स्थूलो निरवयवानेकात्मको भवितुमर्हति, अपि त्वेकः स्थूलात्मक एवेति। सोऽप्येवं वाच्यः – किं विजातीय-

परमाण्वन्तरमन्तरं आहोस्वित् शून्याकाशयोगः।
तत्र शून्याकाशयोगस्तावदवस्तुतया नेन्द्रियप्रत्यक्षगोच-
रः। अर्थसामर्थ्यभाविनि तत्र अर्थस्यैव प्रतिभासोपपत्तेः।
विजातीयं त्विन्द्रियान्तरग्राह्यं कथमिन्द्रियान्तरज्ञानेऽ-
वभासेत अविषयत्वात्। तत् केन अन्तरेणावभा-
सितव्यमिति न विद्मः। यत् पुनरुच्यते अन्तराला-
नवभासे विविक्ता नावभासेरन्निति। तत्रापि किमेषाम-
[81] न्तरं विवेकः पररूपशून्यता वेति, चिन्त्यम्। निरूपय-
न्तस्तु पररूपशून्यतामेव विवेकं वस्तुनो पश्यामः। पररूप-
शून्याश्चेमे भासमानाः कथं विविक्ता नावभासेरन्निति।
ननु च न प्रत्येकं परमाणूनां स्थूलाकारः। ततः समुदिता-
नामेषव्यः। यथा च नीलपरमाणूनां प्रत्येकमसम्भवन्
पीताकारो बहुष्वपि न दृश्यते तथा प्रत्येकमसम्भवन्
स्थूलाकारः कथं बहुषु स्यादिति।

उक्तमत्र – अविरुद्धो निरवयवानां स्थूलाकार
वृत्ति। नीलविरुद्धस्तु पीताकारः। ततः पीतविरुद्धं
नीलाकारं बिभ्राणेषु बहुष्वपि कथं पीताकारो भवेत्।

नैवं निरवयवत्वविरुद्धः स्थूलाकारः यथोक्तान्यायात् ।
तदेवं प्रत्यक्षसिद्धः स्थूलोऽर्थः इह धर्मीति व्यवस्थितम् ।
तदेवमवस्थिते धर्मिणि हेतोः सत्त्वमसत्त्वं वा निरूप्यम् ।
तत्र पाण्यादावेकस्मिन् कम्पमाने स्थूलोऽर्थः सकम्प-
निःकम्पे रूपे युगपत् प्रतिपद्यमानः कथं विरुद्धधर्मसंसर्ग-
वान्न स्यात् । सकम्पनिःकम्पयोर्हि रूपयोः परस्परा-
भावाव्यभिचारनिमित्तकोऽस्ति विरोधः । भावाभावयोरेव
हि परस्परपरिहारात्मको विरोधः । वस्तुनोस्तु तदभावाव्य-
भिचारेणैव । इह च सकम्पनिष्कम्पे रूपे गृह्णत् प्रत्यक्ष-
[४२] मेव सामर्थ्यात् परस्पराभावं साधयति ।,, व्यवहारयति तु
निर्विशेषणैव अनुपलब्धिः । स्यादेतत् पाण्यादावेक-
स्मिन्नवयवे कम्पमाने नावयविनः कम्परूपमभ्युपेयम् ।
अवयव एव हि तदा क्रियावान् दृश्यते । न चेदं
मन्तव्यम् । अवयवे क्रियावति तदाधेयेन अवयविनापि
क्रियावता भवितव्यम् । यथा रथे चलति तदारूढोऽपि
चलतीति । अवयवावयविकर्मणोर्भिन्ननिमित्तत्वात् ।
निमित्तायौगपद्याच्च । यदा हि आत्मनः पाणिकम्पनेच्छा

पाणि

भवति। ततः प्रयत्नः। तदा प्रयत्नवदात्मसंयोगा-
त् पाणौ क्रिया। यदा तु शरीरकम्पनार्थः प्रय-
त्नविशेष आत्मनो जायते। तदा तत्प्रयत्नवदात्म-
संयोगात् शरीरे कर्मेति निमित्तभेदः। अतो भिन्न-
(निमित्त) मिति तयोरेकस्मिन् जाते कथं निमित्तान्तरप्रतिब-
द्धजन्मा तदभावे तदपरोऽपि तथैव जायेत। रथ-
तदारूढकर्मणोस्तु सत्यपि निमित्तभेदे निमित्त-
यौगपद्यात् सहभावः। तथा हि नोदनं रथकर्मणो-
ऽसमवायिकारणम्। तदारूढकर्मणस्तु नोद्यसंयोगः।
तयोश्च सहभावात् कर्मणी अपि यौगपद्येन जा-
येते। तदेतत् सकलमालोच्य भदन्तधर्मोत्तरेणेद-
मुक्तम् — न चात्राऽवयवः क्रियावान्। अवय-
वेषु हि क्रियावत्सु विभागो जायते। क्रियाया
[83] विभागारम्भं प्रति निरपेक्षकारणत्वात्। तेन च
(र्ति) संयोगेऽसमवायिकारणे निवर्तते निवर्तेत अवयवि
द्रव्यमिति। इदमाहुरत्र कणादशिष्याः — नोदना-
दभिघाताद्वा जायमानः क्रियाविशेषो द्रव्यारम्भक-

संयोगप्रतिद्वन्द्विविभागारम्भको दृष्टः। अन्यत्तु विभा-
गमात्रमारभते न तु यथोक्तविशेषणम्। अन्यस्मिन्
पक्षसंकोचविकाशादिके कर्मणि अवयवसंयोगनिवृ-
त्तेरदर्शनात्। तद्वत् प्रयत्नजन्यस्यापि कर्मणो नास्ति
संयोगनिवर्तनसामर्थ्यम्। ततो नास्ति द्रव्यनिवृत्तिरिति।

अयमत्र समाधिः- इह अवयविनि क्रियावति
नियमेन अवयवैरपि क्रियावद्भिर्भवितव्यम्। अन्य-
था अवयवसंसृष्टेभ्य आकाशदेशेभ्यो विभागोऽवयवा-
संसृष्टैश्च संयोगोऽवयविनः क्रियावतः स्यात्। अवयवा-
स्तु क्रियाविरहिणः पूर्वाक्रान्तेभ्यो नभोदेशेभ्यो
नापसर्पेयुः। अवयविसमाक्रान्तैश्च देशैर्नाभिसंबध्ये-
रन्। न चावयविसंयोगविभागाभ्यामवयवसंयोग-
विभागौ वाच्यौ, कार्यसंयोगविभागयोः कारणसंयोग-
विभागौ प्रति निमित्तभावानभ्युपगमात्। कारणसंयोग-
विभागावेव हि कार्यसंयोगविभागावारभेते।

न च विपर्ययः सिद्धान्तहानिप्रसंगात्। तेन
अवयवावयविनां पृथग्देशत्वादाधार्याधारभावहानौ

~~समवायोऽपि न व्यवतिष्ठेत। तस्मादवयविनि~~

[8.5] क्रियावति अवयवाः क्रियावन्त इत्यकामकैरपि वैशेषिकैरिदमभ्युपेयम्। यथा चावयविक्रियायामवयवाः क्रियावन्तः तथा अवयवेष्वपि क्रियावत्सु तदवयवैः क्रियावद्भिर्भाव्यमिति। अनया दिशा द्व्यणुके क्रियावति तदारम्भकौ परमाणू क्रियावन्तौ मन्तव्यौ।

अतश्चलावयवसम्बन्धिनश्चलाः परमाणवः। निष्क्रियावयवसम्बन्धिनस्तु निष्क्रियाः। परमाणुक्रियायां तदारब्धमपि द्व्यणुकद्रव्यं क्रियावत् प्रसज्येत। सर्वावयवक्रियायाः कार्यक्रियाऽविनाभूतत्वात्। एकस्य परमाणोः क्रिया न परस्येति चेत् सक्रियनिःक्रियौ तर्हि परमाणू परस्परं विभज्यमानौ उज्झितद्रव्यारम्भकसंयोगौ स्याताम्। ततश्च द्रव्यनाशः। एवं च द्व्यणुकद्रव्यस्य क्रियावत्त्वे त्र्यणुकेऽपि क्रिया स्यादित्यनेन क्रमेण परिदृश्यमानोऽचलश्चलः स्यादवयवः। तस्मान्निःक्रियावयवसम्बन्धिनो निःक्रियाः

परमाणवश्चलावयवसम्बन्धिभ्यश्चलेभ्यो विभज्यमाना द्रव्यारम्भकसंयोगविनाशवन्तः स्युः। निरवयवो हि परमाणुर्यमणुमात्रनभोदेशमाक्रम्य परमाण्वन्तरेण संयुज्यते ततो विभज्यमानः कथमनुज्झितपरमाण्वन्तरप्रत्यासत्तिकः स्यात्। सावयवो हि भाव एकेनावयवेन

[85] वस्त्वन्तरसंयुक्त एव अवयवान्तरैश्चलैः पूर्वाक्रान्तान्नभोदेशान् विरहय्य देशान्तरमाक्रमेत्। निरवयवेषु त्वत्यन्तमस्तमितेयं कथेति युक्तं द्रव्यनाशप्रसंगमुत्पश्यामः।

अथवा अन्यथायं विरुद्धधर्मसंसर्गः। तथाहि— आवृते एकस्मिन् पाण्यादौ स्थूलस्यार्थस्य आवृतानावृते रूपे युगपद् भवन्ती विरुद्धधर्म[illegible] द्वयसंयोगमस्यावेदयतः। न चानावृतैकरूप एवायमिति शक्यं वक्तुम्, अर्धावरणेऽपि अनावृतस्य पूर्ववद्दर्शनप्रसंगात्। अवयवदर्शनायत्तोपलब्धेः तद्दृष्टौ अस्या(स्य) दृष्टिरिति चेत्। अदृष्टिरेव तर्हि अस्यास्तु। न तु दृष्टयदृष्टी। नन्वस्त्येव अवयविदर्शनमवयवाव-

रणेऽपीति कोऽयं प्रसंगः। एवं तर्हि स्थूलः प्राग्वदुप-
लभ्येत। इदमत्राह कश्चित् – भूयोवयवेन्द्रियसन्नि-
कर्षसहायोऽवयवीन्द्रियसन्निकर्षः स्थूलोपलब्धेर्निमित्तं
न चार्धावरणे भूयसामवयवानामस्तीन्द्रियसन्निकर्षः
ततो न स्थूलग्रहणमिति। सोऽप्येवं प्रष्टव्यः। किं
स्थूलो नामावयविनोऽन्यः। स एवानेकव्यापी स्थूलः
तत्र यद्यवयव्येव स्थूलः तदा तद्ग्रहणे कथं न स्थूलग्र-
हणमिति चिन्त्यम्।

अथ स्थूलत्वाख्यः परिमाणविशेषो गुणः स द्रव्या-
दन्यः एवेति चेत्। एवं तर्हि परिमाणरहितमेव तत्
[86] द्रव्यमुपलभ्यते न त्वस्य अन्येनान्येन परिमाणेन
योगः। न चास्यानेकपरिमाणकल्पनापि साध्वी।
युगपत् सर्वेषामनुपलब्धेः। न च ह्रस्वस्य दर्शननि-
वृत्तिर्युक्ता। अवयवस्यैव तत् परिमाणमुपलभ्यत इति
चेत्। यद्येवं स एव तर्ह्यवयवः स्वेन परिमाणेन
सम्बद्धः प्रत्यक्षोऽस्त्वावरणकाले नावयवी। स्यादेतद्-
एकार्थसमवायाद् भ्रान्तिनिमित्तादवयव्येव अवयवपरि-

~~माणेन सम्बद्धः प्रतिभातीति। तदपि न शोभनम्।~~
द्वयोः समपरिमाणयोरवयवावयविनोः प्रतिभासप्रसं-
गः। यस्य हि महत्तोऽवयवस्य तत् परिमाणम् स तावत्
स्वेन परिमाणेन सम्बद्धः प्रतिभाति। अवयविनश्च
तत्परिमाणसम्बद्धप्रतिभासाभ्युपगमे द्वयोः समपरिमाण-
योरवयवावयविनोः प्रतिभास आसज्यते) ⟶
← न चास्ति यथोक्तः प्रतिभासः। परिमाणरहितः
सोऽवयवः प्रतिभास (ती!) इति चेत्। स्यादेतत् यस्यावय-
वस्य परिमाणेन अवयवी सम्बद्धः प्रतिभाति स स्वं
परिमाणं परित्यज्याभातीति। इदमपि परिमाण
विरहिणोऽवयवस्यादृष्टेरशक्यं कल्पयितुम्। एकार्थ
समवायाच्च भ्रान्तिनिमित्तादल्पतरावयवपरिमाणवानप्य-
वयवी प्रतिभासेत। न च बाधकमन्तरेण भ्रान्तिरपि
शक्या स्थापयितुम्।

[87] अस्ति (स्तु) तर्हि स्थूलोऽवयव एव प्रत्यक्षः। एवमा-
वरणकाल इवानावरणावस्थायामपि स्थूलतरोऽवयवः
प्रत्यक्षोऽस्तु। परमध्यवर्तिनामवयवानामिन्द्रियसन्निकर्षा-

## अवयविनिराकरणम्

~~भावे स्थूलतमावयविदर्शनानुपपत्तेः। स्यान्मतम्~~
निखिलावयवदर्शनं न स्थूलप्रत्यक्षकारणम्। किन्तु
भूयोऽवयवदर्शनमिति। इदमपि न सम्यक्। अभिमुखा-
वस्थितस्य हि पर्वतादेरर्वाचीनावयवदर्शनेन तथा
स्थूलप्रतिपत्तिर्यथार्वाक्परमध्यवर्तिनां दर्शने। ततो
न यावन्निरवशेषावयवदर्शनं तावत् कथं स्थूलतमा-
र्थप्रतिपत्तिः स्यात्। न चावयवा अर्वाक्परमध्यव-
र्तिनो युगपद्दृश्यन्ते। तत् कथमवयवी स्थूलो दृश्येत।
क्रमेण दिशामवयवानां प्रत्यक्षीकरणे प्रत्यक्षः
स्थूलोऽवयवीति चेत् अन्यथा तु कः प्रत्यक्ष
इति विमृष्यम्। अवयव इति चेत्। अवयवी[1] (वा?)
अपि परमध्यवर्तिनो न युगपद्दृश्यन्ते इति कथं
सोऽपि प्रत्यक्षः स्यात्। तदेवं नावयवी नावयवाः
प्रत्यक्षा इति न किञ्चिद्दृश्येतेति। तत् सिद्धमावृता-
नावृतरूपः स्थूलोऽर्थ इति।

तथा रागारागाभ्यां विरोधः सम्भावनीयः। तथाहि
— एकस्मिन्[2] रक्ते स्थूलोऽर्थो रक्तारक्ते रूपे

1 अवयवी ... सोऽपि thus it may be construed
here but it is not satisfactory. 2 °स्मिन्नुक्ते /

## अवयविनिराकरणम्।

युगपत् प्रतिपद्यमानो विरुद्धरूपद्वययोगमात्मनः
[४४] प्रकाशयति। नन्ववयव एव रक्तोऽवयवी त्वेकरूप
एवेति। यद्येवं रागद्रव्यसंयोगो हि रक्तत्वम्।
अवयवस्य च रागद्रव्येण संयोगेऽवयविनोऽपि तेन
भाव्यम्। अवश्यं हि कारणसंयोगिना कार्यमपि संयु-
ज्यत इति समयात्। यस्तु आह- रक्त एवावय-
वी। अस्ति हि कुंकुमारक्ते परावयवे कुंकुमारक्तः
पर इति प्रत्ययः। ततो रागद्रव्यसंयुक्त एवावयवीति
तस्यापि वर्णान्तरानवभासः स्यादवयविनः। रागद्रव्यं
हि प्रत्यासीदत् निजरूपं वस्तुनस्तिरोधत्ते स्वेन च
रूपेण द्रव्यं सम्बध्नाति। यथा रक्तोवयवस्तिरोहितसह-
जरूपो रागद्रव्यसमवायिना रूपेण सम्बन्धी प्रतिभाति
[तथा] अवयविन्यपि रागद्रव्यसंयोगिनि वर्णान्तरानवभा-
सप्रसंगो दुर्वारः। तन्न रक्त एवावयवीति शक्यं
वक्तुम्।

अन्यस्तु संयोगस्याऽव्याप्यवृत्त्या समा-
धत्ते। स ह्याह- शब्द इवाऽव्याप्यवृत्तिः संयोगः।

~~तेनैकार्थौ रूक्षश्चारूक्षश्चेति। सोऽप्येवं पर्यनुयो~~

ज्यः। कथमव्याप्यवृत्तिः। यदि हि स्वाश्रये सम-
वेतो, रूपादिवत् व्याप्यवृत्तिरेवायम्। असम-
वेतश्च अवृत्तिरेव आप्यद्रव्येष्विव गन्धः।
[भ्याम्? व?] एकत्र संयोगस्य भावाभाव(व्यापिनो) वृत्तिरिति
[४१] चेत्। स्यादेतत् - यथा विरुद्धावपि रूप-रसा-
वेकमाश्रयेते तथा संयोगस्याऽप्येकत्र भावाभावौ
युगपत् स्याताम्।

अहो मोहविजृम्भितम्। अभावो हि भावनिवृ-
त्तिरूपो नास्य भावनिवृत्तिं हित्वा रूपान्तरमीक्षते।
यश्च यन्निवृत्तिरूपः स कथं तस्मिन् सत्येव भवति।
भावे वा तन्निवृत्तिरूपतां जह्यात्। तथा हि अनलं
पश्यन्नपि सलिलार्थी तत्र प्रवर्तेत। जलविविक्त-
स्यानलस्य दर्शनात् जलाभावसिद्धेरप्रवृत्तेरिति
चेत्। भवतु अनुपलम्भाज्जलाभावसिद्धिः तथापि
जलसत्तां सम्भावयन् जलार्थी प्रवर्तेत। ननु तत्र
यदि जलं स्यादुपलभ्येत। किमतः। अतोऽनुपलम्भाद-

भावो जलस्येति। यद्यपि अभ्युपगत्तैव जलाभावसिद्धिः तथापि तदर्थिनः तद्भावशंकया प्रवृत्तिः स्यात्। युगपदेकत्र संयोगस्य भावाभावौ दृश्येते। तेनैवं कल्पयामः न स्वेच्छया। ननु किमभावो भावप्रतिषेधात्मकः प्रतीयते अन्यथा वा। तत्र भावनिवृत्तिरूपेऽभावे सिद्धे कथं भावोपलब्धिर्न भ्रान्ता स्यात्। भावाप्रतिषेधात्मकश्च नाभावः। नाममात्रं तु स्यात्। न च नाममात्रादर्थस्य तथाभावः। रूपरसयोस्तु न परस्परनिवृत्ती रूपमिति कथं तदुदाहरणमिह शोभेत। न च रूपरस-
[१०] योरेकत्र समवायोऽस्माभिरनुमन्यते। शब्दोऽप्येवमेव अव्याप्यवृत्तिरसिद्धः, स कथं प्रकृतसंशयनिवृत्तये कल्प्येतेति अलं बहुभाषितया।

अथवा स्थूलोऽर्थः तदतद्देशः प्रतीयते [तद] तद्देशयोश्च परस्पराभावाव्यभिचारनिमित्तोऽस्ति विरोधः। अतो विरुद्धधर्मसंसर्गः स्थूलस्य। स्यादेतत्- कथं तदतद्देशयोः परस्पराभावाव्यभिचारः। उच्यते- इह तावदेकस्मिन् देशे परिच्छिद्यमाने तादूप्यप्रच्युति-

रस्य व्यवच्छिद्यते। तदव्यवच्छेदे तत्परिच्छेदाभाव प्रसक्तेः। प्रच्युतिवच्च प्रच्युतिमदपि देशान्तरं व्यवच्छिद्यते। यदि हि परिच्छिद्यमानो देशान्तरस्वभावो भवेत् तदा तद्रूप एव उपलब्धो भवेत्। देशान्तररूपं तु विरहय्य स्वेन रूपेण प्रकाशमानो देशो देशान्तरासंसृष्ट इत्यवसीयते। यथा च देशस्य देशान्तरासंसर्गः तथा तेनाधारभूतेन देशेन यद् व्याप्तं रूपं, तदपि देशान्तरसंसर्गाद् व्यवच्छिन्नं भवति। कथं हि तेन देशेन व्याप्तं रूपं तदभाववति देशान्तरे वर्तेत। यथा एकेन देशेन व्याप्तो घटो न देशान्तरे वर्तते। देशान्तरेऽनुपलम्भादवृत्तिरिति चेत्। विप्रकृष्टे देशान्तरे कथमस्याभावः प्रतिपत्तव्यः। तस्मादिदमकामकेनापि वाच्यम्- यदुत एकदेशव्याप्तं रूपं न देशान्तरे वर्तेत इति। तस्य तेन व्यापनप्रसंगात्।

[91] तदभाववति देशान्तरे वर्तमानोऽपि तेन देशेन व्याप्येत। न च व्याप्तिरस्य शक्यावसातुम्। भागान्तरासम्भवात्। एतेन यन्निरस्तं यदाह कश्चित्- यथैको भावः तदतद्देशं

जनयन् न विरुध्येत इति। तदपि न प्रकृतानुरूपम्।

तथाहि— भावाभावावेव परस्परपरिहारेण विरुद्धौ न वस्तुनी। वस्तुनोस्तु परस्पराभावाव्यभिचारेण विरोधः। तेन यदेव वस्तु वस्त्वन्तरप्रच्युतिमत् तदेव तेन विरुद्धम्। न चैककार्यनिर्वर्तनशक्तिः कार्यान्तरशक्त्यभावाव्यभिचारिणी। अनुपलम्भो हि वस्तुनो वस्त्वन्तराभावाव्यभिचारं साधयति। एककार्यनिर्वर्तनशक्तिमति च रूपे गृह्यमाणे कार्यान्तरनिर्वर्तनशक्तिरपि परिच्छिद्यत इति कथं तदभावः। एकदेशसम्बद्धं तु रूपं देशान्तरसंसर्गिरूपपरिहारेण उपलभ्यमानं तदभावाव्यभिचारि तेन विरुद्धम्। यथा अत्यन्तसदृशोर्वस्तुनोः युगपदुपलभ्यमानयोः सत्यपि चाकारभेदे दूरादनुपलक्ष्यमाणभेदयोर्देशभेदमात्रनिमित्तकं प्रत्यक्षावसितं विरोधमाश्रित्य भेदोऽवस्थाप्यते। यस्त्वाह— यथैकं चक्षुर्विज्ञानं भिन्नेषु चक्षुरादिषु वर्तते तदधीनोत्पादतया

[१२] तथान्योऽपि भिन्नदेशनिवृत्तिर्न भेत्स्यत, इति।

सोऽपि देशभेदनिमित्ते विरोधेऽवस्थाप्यमाने वस्तुनः कारणभेदनिमित्तं विरोधमासञ्जयन् न नैपुण्यमात्मनो निवेदयति। न हि विज्ञानस्य देशोऽस्ति कश्चित् अमूर्तत्वात्। स्यादेतत् यथा देशभेदनिमित्तो विरोधः तथा कारणभेदनिमित्तोऽपि स्यात्। को हि वस्तुनो विशेषः कारणभेदाद्देशभेदस्येति।

उक्तमिह - परस्पराभावाव्यभिचारनिमित्तो वस्तूनामस्ति विरोधः। स देशभेदेऽपि सन्नि
(अ)१ धीयते न कारणभेदे। देशभेदवती हि रूपे अन्योन्यपरिहारेण उपलभ्यमाने परस्पराभावाव्यभिचारिणी भवतः, न कारणभेदवती। तदेवं कम्प-रागाऽऽवरणभावाभावकृते देशभेदनिबन्धने च चतुर्थे विरुद्धधर्मसंसर्गेऽवय-
विरहमात्रनिबन्धनो भेदव्यवहारो वस्तूनां दृष्टः, अहेतोरयोगात्। निमित्तान्तरस्य वाऽदर्शनात्। ततो विरुद्धधर्मसंसर्गेऽपि भवन्-
विविषयेऽवस्थापिते पक्षधर्मत्वं सिद्धं हेतोः। अधुना व्याप्तिरेवास्य स्वसाध्येन समर्थनीया। इह विरुद्धधर्मसंसर्ग

भेदव्यवहारो व्यापकं निमित्तवत्त्वं जह्यात्। ततो व्यापकानुपलब्ध्या तस्माद् व्यावृत्तो विरुद्धधर्म-विरहेण व्याप्यते। तद्विरुद्धश्च विरुद्धधर्मसंसर्गः। तेनेयं व्यापकविरुद्धोपलब्धिर्भूमिका। एवं
[93] प्रसाधितेऽस्यास्त्रैरूप्येऽसिद्ध-विरुद्धा-ऽनैकान्तिका दोषा नावकाशं लभन्त इति।

एवं मया बहुषु दुर्मतिनिर्मितेषु
प्रत्युद्धृतेषु खलु दूषणकण्टकेषु।
आचार्यनीतिपथ एव विशोधितोऽय-
मुत्सार्यमत्सरमनेन जनः प्रयातु॥

समाप्तं चेदमवयविनिराकरणमिति।

||नमः श्री अन्तरिक्षपार्श्वनाथाय ||
पण्डिताशोकविरचिता

ज्येष्ठवद-१. 

[पम] सामान्यदूषणदिक्प्रसारिता ।

व्यापकं नित्यमेकं च सामान्यं यैः प्रकल्पितम् ।
मोहग्रन्थिच्छिदे तेषां तदभावः प्रसाध्यते ॥

कथमिदमवगम्यते । परस्परविलक्षणक्षणेषु प्रत्यक्षसमीक्ष्यमाणेषु अभिन्नधीध्वनिप्रसवनिबन्धनमनुयायिरूपं सामान्यं न मान्यं मनीषिणामिति । साधकप्रमाणविरहात् बाधकप्रमाणसम्भवाच्चेति ब्रूमः । तथाहि यदिदं सामान्यसाधनमनुमानमभिधीयते परैः – यदनुगताकारं ज्ञानं तदनुगतवस्तुनिबन्धनं यथा बहुषु पुष्पेषु स्रक् स्रगिति ज्ञानम् । अस्ति च परस्परसम्पर्कविकलकलासु कार्यादिव्यक्तिषु अनुगताकारं विज्ञानम् । तदनैकान्तिकतादोषाक्रान्तशरीरत्वात् न तद्भावसाधनायालम् । यतो भवति बहुषु पाचकेषु पाचकः पाचक इति एकाकारपरामर्शप्रत्ययः । न च तेषु

अनुगतमेकं वस्तु समस्ति। तद्भावे हि प्रागेव
तथाविधप्रत्ययोत्पादप्रसंगो दुर्निवारः। क्रियोपका-
[95] रापेक्षाणां स्वलक्षणानां सामान्यव्यञ्जकत्वा-
दयमदोष इति चेत्। नैतदस्ति। नित्यानामना-
धेयातिशयतया अनुपकारिणि सहकारिणि
अपेक्षाऽयोगात्। सातिशयत्वे वा प्रतिक्षणं
विशरारुशरीरत्वात् क्रिया कुत इति दोषो
दुष्परिहरः। क्रियानिबन्धनत्वात् पाचकेषु
अनुगताकारप्रत्ययस्य नानैकान्तिकतादोष
इत्यपि वार्तम्। प्रतिभेदं भिद्यमानानां कर्मणां
तन्निबन्धनत्वायोगात्। भिन्नानामपि अभिन्ना-
कारज्ञाननिबन्धनत्वे व्यक्तीनामपि तथाभावो
न राजदण्डनिवारितः। ततश्च सामान्यमेव
नोपेयं स्यात् इति मूलहरं पक्षमाश्रयता
देवानांप्रियेण सुष्ठु अनुकूलमाचरितम्।
अनेनैव न्यायेन क्रियाकारकसम्बन्धमभिन्न-
ज्ञाननिबन्धनमुपकल्पयन् प्रतिक्षिप्तः।

पाकक्रियानिबन्धनः पाचकेष्वनुगताकारः प्रत्ययः ततो नानैकान्तिकतादोष इत्यपि न मन्तव्यम्। न हि अर्थान्तरसम्बन्धिनी जातिरर्थान्तरप्रत्ययोत्पत्तिहेतुः, अतिप्रसंगात्। स्यादेतत् समवेतसमवायसम्बन्धबलात् पाकक्रियासामान्यं पाचकेषु अभिन्नाकारं परामर्शप्रत्ययमुपजनयति ततो न यथोक्तदोषः। तदिदमप्यसारम्। यत् उदयानन्तरापवर्जि(र्गि)तया कर्मणामेव असम्भवात्, विनष्टे कर्मणि तत् सामान्यं न कर्मणि तदभावादेव
[१८] नापि कर्तरीति सम्बद्धसम्बन्धोऽप्यस्य नास्तीति नाभिन्नप्रत्ययहेतुः। तस्मात् स्थितमेतत् तदनैकान्तिकतादोषदुष्टत्वाद् नेदमनुमानं सामान्यसत्तासाधनाय पर्याप्तमिति।

इतश्चापि न सामान्यसत्तासाधनमिदमनुमानम्। यथैव हि परस्परासंकीर्णस्वभावा अपि शाबलेयादयो भावाः कयाचिदेव तदेककार्यप्रतिनियमलक्षणया स्वहेतुबलायातया प्रकृत्या तदेकमभिमतमनुगत-

रूपमुपकुर्वते तदपरसामान्यमन्तरेण, अन्यथा अन-
वस्थाप्रसंगात्। तथा तमेकं परामर्शप्रत्ययमुप-
जनयन्तु, किमन्तरालगडुना व्यतिरेकवता सामा-
न्येन उपगतेन।

अथोच्यते – प्रतिनियतशक्तयः सर्वभावाः। एत-
च्च सामान्यापलापिभिरपि नियतमभ्युपगमनीयम्।
अन्यथा कुतः शालिबीजं शाल्यङ्कुरमेव जनयति
न कोद्रवांकुरमिति परपर्यनुयोगे भावप्रकृतिं
मुक्त्वा किमपरमिह वचनीयमस्ति। एतच्च उत्तर-
मस्माकमपि न वनौकःकुलकवलितम्। तथा हि
वयमप्येवं शक्ता एव वक्तुम्।

सामान्यमेव उपकर्तुं शक्तिर्व्यक्तीनां भेदावि-
शेषेऽपि न तदेकं विज्ञानमुपजनयितुमिति। अनुत्तरं
बत दोषसङ्कटमत्र भवान् दृष्टिदोषेण प्रविश्यमानो-
ऽपि नात्मानमात्मना संवेदयते। तथा हि- शालि-
[97] बीजतदंकुरयोरन्वयव्यतिरेकानुपलम्भनिबन्धने कार्यकार-
णभावेऽवगते शालिबीजं शाल्यङ्कुरं जनयितुं

~~शक्तं न कोद्रवाङ्कुरमिति शक्यमभिधातुम्।~~
नैवं सामान्यतद्वतोरुपकार्योपकारकभावः कुतश्चन प्रमाणान्निश्चितः। तत्कथमिदमुत्तरमभिधीयमानमाद्धीत साधिमानमित्यलमलीकनिर्बन्धनेन।

न साधकप्रमाणविरहमात्रेण प्रेक्षावतामसद्व्यवहारः। ततस्तदभावसाधकमनुमानमभिधीयमानमस्माभिराकर्ण्यताम् – यद् यदुपलब्धिलक्षणप्राप्तं सन्नोपलभ्यते तत्तदसदिति प्रेक्षावद्भिर्व्यवहर्तव्यम्, यथा अम्बराम्बुरुहम्, नोपलभ्यते च उपलब्धिलक्षणं प्राप्तं सामान्यं क्वचिदपीति स्वभावानुपलब्धिः। न चात्रासिद्धिदोषोद्भावनया प्रत्याख्यातव्यम्; तथा हि अत्रासिद्धिर्भवन्ती स्वरूपतो विशेषणतो वा भवेत्। तत्र न तावदाद्यं सम्भवति। अन्योपलम्भरूपस्य अनुपलम्भस्याऽभ्युपगमात्। तस्य च स्वसम्वेदनप्रत्यक्षसाक्षात्कृतस्वरूपत्वात् कुतः स्वरूपासिद्धदोषावकाशः।

अथोच्यते – स्वसंवेदनमेव न सम्भवति। स्वात्मनि क्रियाविरोधात्। न हि तयैव असिधारया सैव असिधारा छिद्यते; तदेवाङ्गुल्यग्रं तेनैवाङ्गुल्यग्रेण स्पृश्यत इति।

अतोऽसिद्ध एवायं हेतुः। तदिदं स्वसंवेदनशब्दार्था-
(वः)९[१४] परिज्ञानविजृम्भितम् एव प्रकटयति वाव:(चः)।
तथाहि कलश-कलधौत-कुवलयादिभ्यो व्यावृत्तं
विज्ञानमुपजायते। तेन बोधरूपतया उत्पत्तिरेवास्य
स्वसंवित्तिरुच्यते, प्रकाशवत्। न कर्मकर्तृक्रिया-
भावात्। एकस्यानंशरूपस्य त्रैरूप्यानुपपत्तितः।
यथैव हि प्रकाशकान्तरनिरपेक्षः प्रकाशः प्रकाश-
मानः आत्मनः प्रकाशक उच्यते तथा ज्ञानमपि
ज्ञानान्तरनिरपेक्षम् प्रकाशमानमात्मनः प्रकाश[क]-
मुच्यते। ततोऽयं परमार्थः- न ज्ञानं ज्ञानान्तर-
संवेद्यमुपपद्यते। नाऽप्यसंविदितमुच्यते। यथाप्रका-
रे च स्वसम्वेदनशब्दार्थे विवक्षिते न किञ्चिद् वच-
नीयकमस्ति कुतो यथोक्तदोषावसरः। नापि विशे-
षणासिद्धयाऽसिद्धिरुद्भावनीया। उपलब्धिलक्षण-
प्राप्ततया सामान्यस्य स्वयमेव परैरुपगमात्।
तथानभ्युपगमे वा न सामान्यबलेन वा (बाहु)कुलेयादि-
षु अनुगताकारौ धी-ध्वनी स्याताम्। न हि यतो

~~यत्र ज्ञानाभिधानप्रवृत्तिः तदनुपलक्षणे तस्य प्रतीति-~~
र्भवति दण्डवत्।

यत् पुनरिदमुद्योतितमुद्योतकरेण — किं सामान्यं प्रतिपद्यसे न वा? यदि प्रतिपद्यसे, कथमपह्नुषे? अथ न प्रतिपद्यसे तदा तस्य असिद्धत्वादाश्रयासिद्धो हेतुः। तदिदं तस्य धर्मिस्वरूपतानभिज्ञताविजृम्भि-
[१९] [illegible] तमाभाति। यतो न, वयं बहीरूपतया सामान्यं धर्मितया अङ्गीकुर्महे। ~~अन्तर्मात्रा~~ अन्तर्मात्राभि-निवेशिनः भावाभावोभयानुभवाहितवासनापरिपाक-प्रभवस्य अध्यस्तबहिर्वस्तुनो ज्ञानाकारस्य धर्मितया उपयोगात्। स च स्वसंवेदनप्रत्यक्षसिद्धतया न शक्यः प्रतिक्षेप्तुम्। तदत्र धर्मिणि व्यवस्थिताः ~~[illegible]~~ सदसत्त्वे चिन्तयन्ति। किमयं सामान्यशब्दविकल्पप्रतिभासार्थो धर्मी परपरिकल्पितबहिःसामान्यनिबन्धनो वेति। तस्य बाह्यानुपादानत्वे^फ साध्यतयाऽनुपलम्भो हेतुः। न पुनस्तस्यैवाभावः साध्यते। तद्विषयशब्दप्रयोगप्रसंगात्। एवंविधे च धर्मिणि विवक्षिते कुत

फ (साध्ये तथा)???

~~आश्रयासिद्धि दोषः । यदुच्यते – प्रत्यक्षप्रमाणसिद्ध~~

स्वभावतया सामान्यस्य असिद्ध एवायं हेतुरिति ।

तदयुक्तं तस्य स्वरूपेणाप्रतिभासनात् । इदमेव हि प्रत्यक्षस्य प्रत्यक्षत्वम् यत् स्वरूपस्य स्वबुद्धौ समर्पणम् । इदं पुनर्मूल्यादानक्रयि सामान्यं स्वरूपं च नादर्शयति प्रत्यक्षतां च स्वीकर्तुमिच्छति । तथा हि न वयं परस्परासंकीर्णशाबलेयादिव्यक्तिभेदप्रतिभासनवेलायां तद्विलक्षणमपरमनुगतमध्यक्षेणेक्षामहे कण्ठेगुणमिव भूतेषु शाबलेयसामान्यबुद्धेरसिद्धेः । तत् कथमदृष्टकल्पनया आत्मानमात्मना विप्रलभेमहि ।

[190] इति नासिद्धो हेतुः । नाप्यनैकान्तिकता शङ्काविषयमतिपतति, विपक्षवृत्त्यदर्शनात् । असपक्षे सम्भवानुपलम्भात् साधारणानैकान्तिकता मा भूत् । सन्दिग्धविपक्षव्यावृत्तिकता तु प्रतिबन्धादर्शनादनिवारितप्रसरैव ।

← तदेतन्न समालोचिततर्ककर्कशधियामभिधानम् । विपर्यये बाधकप्रमाणसामर्थ्यादपसारितसद्भावत्वात् तदाशंकायाः । तथा ह्यसत्त्वे साध्ये सत्त्वं विपक्षः ।

~~तत्र प्रत्यक्षवृत्त्या भवितव्यम्। यतो यद् यदाऽविक-~~
लाप्रतिहतसामर्थ्यं तत् तदा भवत्येव। तद्यथाऽविक-
लबलसकलकारणकलापोऽङ्कुरः। सति च चक्षुरादि-
साकल्ये दृश्ये वस्तुनि अविकलाप्रतिबद्धशक्तिकारणं
प्रत्यक्षं ज्ञानमिति स्वभावहेतुः। ततो विरुद्धोपलम्भा-
द् विपक्षाद् व्यावर्तमानो हेतुः असद्व्यवहारयो-
ग्यत्वेन व्याप्यत इति ~~[illegible]~~ व्याप्तिसिद्धेर्नो-
ऽनैकान्तिकः। अभिमतसाध्यप्रतिबन्धसिद्धेस्तु विरु-
द्धता दूरतरसमुत्सारितरभसप्रसरैव। अतोऽसिद्धतादि-
दूषणशङ्काकलङ्काकलङ्किताद्धेतोः प्रस्तुतवस्तुसिद्धौ सिद्ध-
मसत्त्वं सामान्यस्येत्यलमतिबद्धविस्तरविसारिण्या
कथयेति विरम्यते।

न च वस्तुसंस्थानवत् सामान्यं व्यक्तेर्लक्षणम्।
[101] न चाऽनुवृत्तव्यावृत्तवर्णाद्यात्मके जाति-व्यक्ती, वर्णादि-
नियतप्रतिभासप्रतीतिप्रसङ्गात्। व्यक्तेरेवासौ प्रति-
भास इति चेत् कोऽपरस्तर्हि सामान्यस्याऽनुगता-
कार इति चेत्।

ननु वर्णसंस्थाने विरहय्य किमपरमनुगामि विद्यते। जातिव्यक्त्योः समवायबलादविभावितविभागयोः क्षीरोदकयोरिव परस्परमिश्रणेन प्रतिपत्तेरिति चेत्। न तर्हि सामान्यविशेषयोरेकतरस्यापि रूपं गृहीतम्। स्वरूपाग्रहणेऽनयोरप्यग्रहणमिति निरालम्बनैव सा तादृशी प्रतिपत्तिरिति परमार्थ आवेदितस्तावत्। निरालम्बनया च प्रतीत्या व्यवस्थाप्यमानं सामान्यं सुव्यवस्थापितम्। तस्माद् विशेष्यासिद्ध्यापि नायमसिद्धो हेतुः। सपक्षे वर्तमानो विरुद्ध इत्यपि न मन्तव्यः। अनैकान्तिकताऽप्यस्य न सम्भावनामर्हति। असद्व्यवहारानपेक्षत्वेन हि दृश्यानुपलम्भो व्याप्तः। यदि हि सन्नपि तत्र न प्रवर्तेत। इह सापेक्षः स्यात्। ततो विपक्षाद् व्यापकविरुद्धावरुद्धात् व्यावर्तमानोऽसद्व्यवहारे विश्राम्यतीति। अतस्तेन असद्व्यवहारेण अनुपलम्भो व्याप्यत इति कुतोऽनेकान्तः। ततश्च स एवार्थः समायातः।

एतासु पञ्चस्ववभासिनीषु
प्रत्यक्षबोधे स्फुटमङ्गुलीषु।
[102] साधारणं ~~रूपमचे~~ षष्ठमिहेक्षते यः
शृङ्गं शिरस्यात्मन ईक्षते सः॥
सर्वस्य च पूर्वोक्तस्यायं परमार्थः —
प्रत्यक्षप्रतिभासि वर्त्म न [हि] पञ्चस्वङ्गुलीषु स्थितं
सामान्यं प्रतिभासते न च विकल्पस्याकारबुद्धौ तथा।
ता एवाऽस्फुटमूर्तयोऽत्र हि विभासन्ते न जातिस्ततः
सादृश्यभ्रमकारणौ पुनरिभावेकोपलब्धिध्वनी॥ इति

सामान्यसिद्धिदूषणदिक्प्रसारिता।

कृतिरियं पण्डिताशोकस्य ॥०॥

रत्नाकरशान्तिप्रणीतम्

# [103] अन्तर्व्याप्तिसमर्थनम्।

ॐ नमो बुद्धाय॥

इह सत्त्वमर्थक्रियाकारित्वम्, तदितरसत्त्वलक्षणायोगात्। तच्च क्रमयौगपद्याभ्यां व्याप्तं परस्परव्यवच्छेदलक्षणत्वादनयोः प्रकारान्तरेण करणासम्भवात्। क्रमयौगपद्ये चाऽक्षणिकत्वे न स्तः, पूर्वापरकालयोरविचलितैकस्वभावस्य कर्तृत्वाकर्तृत्वे(त्व) विरुद्धधर्मद्वयायोगात्।

तत्र न तावत् क्रमः, क्रमाणामेकैकं प्रति पूर्वापरकालयोः कर्तृत्वाकर्तृत्वापत्तेः। एवं सर्वक्रमाभावात् केवलं सकलकार्ययौगपद्यमवशिष्यते। तत्र च स्फुटतरः पूर्वापरकालयोः कर्तृत्वाकर्तृत्वप्रसङ्गः। विरुद्धे च कर्तृत्वाकर्तृत्वे एकधर्मिणि न सम्भवतः। एकस्वभावश्च तावत्कालमक्षणिक इति सिद्ध एतस्मिन् क्रमयौगपद्ययोरयोगः। तदेवमक्षणिके व्यापकानुप-

~~लब्ध्या निषिद्धं सत्त्वं अक्षणिक एवाव[ ]तिष्ठते~~
इति क्षणिकत्वेन व्याप्तम् । तत् तेन व्याप्तं यत्
यत्र धर्मिणि सिध्यति तत्र क्षणिकत्वं प्रसाधयति ।
[१०५] इदमेवेदानीं विचार्यते, केयं (क्वेयं) व्याप्तिर्गृहीतव्या दृष्टान्तधर्मिणि साध्यधर्मिणि वा । केचिदाहुः — दृष्टान्तधर्मिण्येव, धूमवत् । अन्यथा साधनवैफल्यं स्यात् । उभयधर्मसिद्धि(द्धे)रनान्तरीयकत्वात् व्याप्तिसिद्धेः । न हि महानससिद्धायामग्निधूमयोर्व्याप्तौ पुनरग्निसिद्धये धूमलिङ्गमन्विष्यत इति । X तथा हि —

दृष्टान्ते गृह्यते व्याप्तिर्धर्मयोस्तत्र दृष्टयोः ।
हेतुमात्रस्य दृष्टस्य व्याप्तिः पक्षे तु गम्यते ॥
सा च सर्वोपसंहारात् सामान्यमवलम्बते ।
तस्य धर्मिणि वृत्तिस्तु प्रतीयेतानुमानतः ॥

प्रत्यक्षदृष्टयोर्हि वह्निधूमयोः कार्यकारणभावसिद्धौ तयोर्व्याप्तिसिद्धिरिति प्रत्यक्षसिद्धे वह्नौ युक्तमनुमानवैफल्यम् । नैवं व्याप्तिसिद्धेः प्राक् प्रमाणान्तरसिद्धं धर्मिणि क्षणिकत्वम् । साधनधर्ममेव तु केव-

X विषम उपन्यासः [illegible]

त्वमनुपश्यन्तो विपर्यये बाधकप्रमाणबलात् तस्य
फ (कु)
क्षणिकत्वेन व्याप्तिं प्रतीमः। तत् तवः साधनवैफल्यम्।
वैफल्यमेव क्षणिकत्वव्याप्तस्य सत्त्वस्य तथात्वेन
धर्मिणि प्रतीतौ क्षणिकत्वस्यापि प्रतीतेरिति चेत्।
न। सर्वोपसंहारवती हि व्याप्तिः साध्यसिद्धेरङ्गम्।
तदियमनपेक्षितधर्मिविशेषं साधनधर्ममात्रमवलम्बते।
[105] तद्यथा। यत्र धूमस्तत्राग्निरिति। न पुनर्यत्र महानसे
धूमस्तत्राग्निरिति। एवमिहापि यत् सत् तत् क्षणिक-
मिति व्याप्तिप्रतीतौ साधनधर्मस्यापि धर्मिणि सत्त्वं
नान्तर्भवति। किं पुनः साध्यधर्मस्य। तस्मात् सत्त्व-
सामान्यस्य साधनधर्मस्य पक्षधर्मत्वं व्याप्तिश्चैकशः
प्रतिपाद्य तदुभयसामर्थ्यात् साध्यधर्मस्य धर्मिणि
वृत्तिः प्रतीयत इति कुतोऽनुमानवैफल्यम्। यद्येवं
व्याप्तिप्रतीतावसति धर्मिणि परामर्शे साध्यधर्मिणि
व्याप्तिग्रहणमिति कुतः। तत्र दृष्टस्य सत्त्वस्य व्या-
प्तिप्रतीतेः। यथा महानसदृष्टाग्निधूमयोर्व्याप्तिग्रहे
दृष्टान्तधर्मिणि व्याप्तिग्रहणमुच्यते। न हि व्याप्तिग्रहणे

फ रेब नाट योस र सुथ या [illegible] य रे रेर योर श प्येर।

※ "गृहीते पक्षधर्मत्वे सम्ब... च स्मृतेऽनुमा। भवद्भिरिष्यते तदन्तव्याप्तावपीष्यताम् ॥" — ...

१२३

महानसपरामर्शोऽस्तीत्युक्तम् । ननु व्याप्तिपक्ष-

धर्मत्वयोरेकशः ~~प्रतिपत्ता~~ प्रतीतावपि यस्यैव

पक्षधर्मत्वमवगतं तस्यैव साध्येन व्याप्तिरवसि-

तेति सामर्थ्यात् साध्यसत्ताकथनमवैयर्थ्यं साधनस्य। [1]

२२ ननु न पक्षधर्मत्वगतिः साध्यगतिः साध्यधर्म(र्मि)-

संस्पर्शात् । नापि व्याप्तिप्रतीतिरेव साध्यसिद्धिः।

सामान्यालम्बनतया धर्मिविशेषेण धर्मयोरनवच्छेदा-

त्, अन्यथा विशेषयोर्व्याप्तिप्रसंगात्। तद्यं व्यस्तवि

षयः 'सामर्थ्यादिति हेतुनिर्देशः। अथ हेतोस्त्रैरूप्यपरि-

च्छेदसामर्थ्यात् साध्यप्रतीतिरुत्पद्यत इत्युच्यते।※ न

[१०८] तर्हीदानीं व्यर्थो हेतुः। स्वरूपनिश्चयेन साध्यनि-

श्चयोपजननात् । न हि क्वचिदियत्ताधिकं लिंगस्य

कर्तव्यमस्ति इति।

अपि च ※गृहीते पक्षधर्मत्वे सम्बन्धे च स्मृते

अनुमानं भवद्भिरिष्यते तदन्तर्व्याप्तावपीष्यताम्।

न हि बहिर्व्याप्तिवादिनामपि विस्मृतायां व्याप्तौ

अनुमानप्रवृत्तिरस्ति । तत्र यस्यैव पक्षधर्मत्वम-

साध्यप्रतीतिः कथम्? साध्यगतिः, कथम्?

1 (सत्ता कथम्? सत्ताकथने कथम्?)

प्रमाणवार्त्तिक ... ।

वंगतं तस्यैव साध्यधर्मेण व्याप्तिस्मृतेः किं न सर्वा-
नुमानवैयर्थ्यम् । साध्यधर्मिणोऽपरामर्शेण व्याप्तेः
स्मरणादिति चेत् साध्यधर्मिणि दृष्टस्यैव व्याप्तिस्म-
रणे कथं साध्यधर्मिणोऽपरामर्शः। सामान्यालम्बन-
नत्वाद् व्याप्तेः साध्यधर्मिणोऽनवच्छेदादिति चेत्।
ननु तत्र दृष्टस्य कथं तेनानवच्छेदः तेनावच्छिन्नस्य
वा असाधारणत्वात् कथं व्याप्तिः? अयोगव्य-
वच्छेदेन विशेषणान्नासाधारणतेति चेत् तथापि किं
न साध्यधर्मी परामृश्यते। यत्र यत्र पर्वते धूमस्तत्र
तत्राग्निर्यथा महानसे इति सामान्यालम्बनायां
व्याप्तौ धर्मिविशेषपरामर्शस्यानङ्गत्वादिति चेत्, युक्त-
मेतत्, साध्यधर्मिणा ह्ययोगव्यवच्छेदः साधनधर्मस्य
रूपान्तरमेव पक्षधर्मत्वाख्यम् । न त्वयं व्याप्तेरङ्गम्।
तमन्तरेणापि व्याप्तेः सामान्यालम्बनायाः परि-
[107] छेद परिसमाप्तेः। कथमन्यथा दृष्टान्तधर्मिणि व्याप्तिग्रह-
णवार्तापि *तदेदानीं (?) पक्षधर्मत्वायोगात् पक्षधर्म-
त्वाग्रहणात्; पक्षधर्मत्वग्रहणे वा तदैव साध्यमपि

* cf. ( = तदा, or तदानीं ? )

卐 [illegible] = सामर्थ्यात् सिद्धमिति ।
* [illegible] = लिङ्गज्ञानमपि ।

卐

<u>सामर्थ्यादसिद्धं सिद्धमिति</u> सर्वानुमानवैयर्थ्य-
<u>प्रसंगः</u>। पश्चात्कालभाविलिङ्गज्ञानमपि च स्मृति-
रेव स्यात् न प्रमाणम्। तस्मात् व्याप्तेरनङ्ग-
त्वात् पक्षधर्मत्वं व्याप्तिग्रहणेऽपि सदपि ना-
न्तर्भवतीति पृथग्गृहीतस्मृतयोः पक्षधर्मत्वव्याप्त्योः
सामर्थ्यादनुमेयमतिरुत्पद्यते इति। एवमवैयर्थ्यं
साधनानामेषितव्यमिति <u>मान</u>फलत्वात्[1]। तद्वत्
पृथग्भूतयोः[2] पक्षधर्मत्वव्याप्त्योः सामर्थ्यादनुमानो-
त्पत्तिरन्तर्व्याप्तावपि किं नेष्यते। तदिष्टौ वा
कथं साधनवैयर्थ्यम्। त्रैरूप्यगतिसामर्थ्यादनुमेय-
गतिरिति हि तदुपादानशक्तिरेव[3] सामर्थ्यमुच्यते।
न नु त्रैरूप्यप्रतीतेरन्तर्भाव इति सर्वं समानम्।
(विप्रतिपत्तौ) न सर्वं समानम्, अन्तर्व्याप्तौ हि व्याप्तिं प्रति-
[illegible] <u>गत्यैव</u> पक्षधर्मत्वमवगतम्, अनवगते पक्षधर्मत्वे
व्याप्तेरप्यनवगतेः। ततो व्याप्तिपूर्वके साधनवाक्ये
(वाक्ये) पक्षधर्मवचनमनर्थकम्। अन्तर्व्याप्तौ नैवं
[illegible] बहिर्व्याप्तौ, बहिरेव व्याप्तिग्रहणात्। अत्राह

is correct.

1 °मनुमानफलत्वात्
[illegible]
2 [illegible] = पृथग्गृहीतस्मृतयोः
3 [illegible] (= तदुपादानशक्तिरेव ?)

येन तेन क्रमेणात्र प्रयुक्ते साधने सति।

[१०४] अवेत्य पक्षधर्मत्वं पश्चाद् व्याप्तिः प्रतीयते॥

*प्रत्यक्ष इव दृष्टान्ते तत्र सेत्यन्यथा कथम्

द्वौ दृष्ट्वा विज्ञ इति चेद् व्याप्तेः प्राक् द्वयदृक् कथम्॥

व्याप्तिपक्षधर्मत्वे हि स्ववाक्याभ्यां येन तेन [क्रमेण] प्रयुक्ताभ्यां सूच्येते, न तु साक्षात्तं प्रतीयेते। वाचः स्वयमप्रमाणत्वात्। यदाह –

शक्तस्य सूचकं हेतुर्वचोऽशक्तमपि स्वयम्। इति।

सूचितयोस्तु तयोः सत्त्वे हेतौ प्रथमतरपक्षधर्मत्वविषयमेव प्रमाणमभिमुखीभवतु। तेन प्रमाणेन धर्मिणि सिद्धस्य सत्त्वस्य पश्चाद् व्याप्तिः प्रमाणान्तरेण गृह्यते इति कस्य वैयर्थ्यमिति। *प्रत्यक्षेऽपि दृष्टान्तधर्मिणि व्याप्तिर्गृहीतेत्येतदेव न स्यात्; दृष्टान्तधर्मिणि अदृष्टस्यैव हेतोर्व्याप्तिग्रहणात्। यद्येवं साध्यधर्मोऽपि व्याप्तिग्रहणाधिकरणे धर्मिणि गृहीतव्य एव यथा वह्निधूमयोरिति चेत्। न। तत्र दृष्टस्य हेतोर्विपक्षे बाधकवृत्तिमात्रादेव व्याप्तिसिद्धेः। ज्ञात- *(सत)

* જેમ સ્થળે [illegible] [illegible] [illegible] છે. (મ. પધા?)

* ૨૮ મે [illegible] [illegible] આટલો પાઠ માં વધારે છે = प्रथमं हेतुग्रहणं पश्चाद् व्याप्तेरिति क्रमोऽयम्। अन्यथा दृष्टान्तधर्मिणि।

१२५

चैवं न खलु व्याप्तिग्रहणात् प्राक् क्षणिकस्य
क्वचिदपि सिद्धिरस्ति, तस्यानुमेयत्वात्। असिद्धा-
यां च व्याप्तावनुमानाप्रवृत्तेः। साधनान्तरस्य च
[१०७] तदर्थमननुसरणात्। अनुसरणेऽप्यनवस्था स्यात्।
अवस्थाने तावत् प्रयासस्य वैयर्थ्यात्। विपर्यये
5 व्याप्तिबलादेव व्याप्तिसिद्धेरविघातात्। वह्नि
धूमयोस्तु नादृष्टयोः कार्यकारणभावसिद्धेः[1] (?)।
तत्सिद्धौ न विपक्षे बाधकवृत्तिरिति द्वयदर्शन
व्यपेक्षा वह्निधूमयोर्व्याप्तिसिद्धिः। सत्त्वक्षणिक-
योस्तु नैवम्। यथोक्तन्यायेन व्याप्तिसिद्धेः।
तस्मात् सत्त्वमात्रस्य तत्र धर्मिणि सिद्धस्य
बाधकवशाद् व्याप्तिः सेत्स्यतीत्येष्टव्यम्।
तद्वदन्तर्व्याप्तावपि। ते इमे व्याप्तिपक्षधर्मत्वे
2 स्वस्वप्रमाणव्यवच्छेद्यसाधनवाक्ये, न तु
केवलं सूचयितव्ये। न चान्यतरवाक्येन शक्य-
मुभयं सूचयितुमिति कुतोऽन्यतरवाक्यवैयर्थ्यम्।
"एकस्यैव हि धर्मस्य क्रमात् त्रैरूप्यनिश्चयः।

5 [illegible] = बाधकबलादेव।
1 [illegible] = सिद्धि?

अन्तर्व्याप्ति समर्थनम् ।

[४]

~~विरुद्धत्वानुमाभावात् तत् किं व्यर्थानुमाखिला ॥~~

इति। अपि च सङ्ग्रहश्लोकः—

बाधकात् साध्यसिद्धिश्चेद् व्यर्थो हेत्वन्तरग्रहः।
बाधकात् तदसिद्धिश्चेद् व्यर्थो धर्म्यन्तरग्रहः॥ फ

यदि हि धर्मिणि व्याप्तिः सिध्यन्त्येव साध्यसिद्धि-
मन्तर्भावयति, ननु लाभ एवैषः, व्याप्तिप्रसाधका-
देव प्रमाणात् साध्यसिद्धेः सत्त्वहेत्वपाश्रयणप्रया-
[110] सस्य निरसनात्। न हि व्यसनमेवैतद् लिंगान्तरा-
नुसरणं नाम। अथ न व्याप्तिसाधकात् साध्यसिद्धिः
न तर्हि अन्तर्व्याप्तौ हेतुवैयर्थ्यमिति किमकाण्डका-
तरतया बहुतरमायासमाविशासि। इयं हि भवतः
साध्यं दृष्टान्तधर्मिणि वृत्तिः साध्यधर्मिणि च
यथाक्रमं व्याप्तिपक्षधर्मत्वयोः सिद्ध्यर्थम्। ननु
यदा प्रतिनियते धर्मिणि विवादः तद्बहिर्भूते च
धर्मिणि व्याप्तिग्रहणं तदानीं भवेद् वैयर्थ्यम्।
यदा तु वस्तुमात्रे विवादः तदा सर्ववस्तुषु हेतो-
र्वृत्तिस्त्वयापि साध्या मयापि चेति कतमस्मिन्

फ [illegible] = धर्म्यन्तरग्रहः। [illegible]

धर्म्यन्तर = दृष्टान्त

धर्मिणि हेतोर्वृत्तिसाधनं मम व्यर्थम् भविष्यति।
कथमिदानीं बहिर्व्याप्तिर्विवादाधिकरणं भूत एव
अन्यतमस्मिन् व्याप्तिप्रसाधनात् तावन्मात्रल-
क्षणत्वाच्च साध्यधर्मिणः। बाधकं प्रमाणं प्रव-
र्तमानमन्तर्गतमपि धर्मिणं बहिष्करोतीति चेत्,
एतदेव कथं भवतु, बाधकेन प्रवर्तमानेनैव
तस्मिन् साध्यसाधनात्। साध्यसंज्ञायोपगमे
साध्यधर्मिणि लक्षणोपगमादिति चेत्, अयुक्त
मेतत्, बाधकमात्रात् न साध्यसिद्धिरित्यस्मिन्
पक्षे धर्म्यन्तरपरिग्रहवैयर्थ्याभिधानात्। बाधकात्
साध्यसिद्धिरित्यस्मिंस्तु पक्षे साधनवैयर्थ्यमापादि
तम्। तस्माद् बाधकमात्रेण साध्यासिद्धौ न क्वचित्
[111] सन्देहनिवृत्तिः। सन्देहानिवृत्तौ न बहिष्करणम्,
अबहिष्कृतश्च साध्यधर्म्येवेति तत्र व्याप्तिरन्त-
र्व्याप्तिरेव नेदानीं बहिर्व्याप्तेर्वार्तापि। तदियं
बहिर्व्याप्तिरमुष्मिन् पक्षे कथं भवति यदि प्रति-
नियते धर्मिणि विवादः। तद्बहिर्भूते च धर्मिणि

Margin notes: ཕྱི་རོལ་ཁྱབ་པ་ཡི ... = विवादाधिकरण- भूत एव।

... सन्देहानिवृत्ति-

1 ... = साध्यस्वरूपो-
पगमे? आ पाठ जरी केओटो? खोटो होय एम लागे छे.

# अन्तर्व्याप्तिसमर्थनम् ।

व्याप्तिग्रहणं [illegible] भवति। तत्र च दुरुद्धरः धर्म्यन्तरपरिग्रहवैयर्थ्यदोषः। बाधकमात्रेण तु साध्यसिद्धौ हेत्व(त्व)न्तरमेव व्यर्थम्। अपि च सत्त्वहेतोर्विशेषेण न बहिर्व्याप्तिसम्भवः। ⟶

असिद्धे धर्मिणः सत्त्वे विवादानवतारतः॥
[1]तत्रासिद्धस्य च व्याप्तिग्रहणे साध्यधर्मिणि॥
व्याप्तिग्रहः कथं न स्यात्? दृष्टान्तेऽपि न वा भवेत्॥

यत्र हि धर्मिणि दृष्टस्य हेतोः व्याप्तिः प्रतीयते तत्र तस्य व्याप्तिग्रहणमाख्यायते। दृष्टं च साध्यधर्मिणि [2]सत्त्वमन्यथा विमत्ययोगादिति [3]कथं नान्तर्व्याप्तिः?

तथापि साधनवैयर्थ्यनिषेधाय बहिरेव गृह्णीमः इति चेत्, तत् किमिदानीं त्वदिच्छानुरोधात् धर्मिणि हेतोर्दर्शनमदर्शनमस्तु [4]दर्शनविशेषे वा बहिरेव व्याप्तिग्रहणव्यवस्थास्तु? उभयत्र दृष्टस्य व्याप्तिग्रहणेऽप्यस्ति बहिर्व्याप्तिभाग इति चेत्, ननु किमर्थमियान् भागो यत्नेन संरक्ष्यते।

1 [illegible] = तत्र सिद्धस्य । ← [illegible]
2 [illegible] = व्याप्तिः [illegible]
3 [illegible] = [illegible] बहिर्व्याप्तिः ?
4 [illegible] = दर्शनविशेषाभावेऽपि वा

[११२] ~~मा भूत् हेतुवैयर्थ्यमिति चेत्, ननु यदि बाधक~~ वृत्तिमात्रेण व्याप्तिग्रहणाधिकरणे धर्मिणि साध्यसिद्धेः साधनवैयर्थ्यमन्तर्व्याप्तौ तदेतद् बहिर्व्याप्तावपि तुल्यम्। तस्माद् व्यसनमात्रं बहिर्व्याप्तिग्रहणे, विशेषेण सत्त्वे हेतौ, केवलं जडधियामेव नियमेन दृष्टान्तसापेक्षः साधनप्रयोगः परितोषाय जायते। तेषामेव अनुग्रहार्थमाचार्यो दृष्टान्तमुपादत्ते—

यत् सत् तत् क्षणिकं यथा घटः इति। पटुमतयस्तु नैवं दृष्टान्तमपेक्षन्ते—

तस्माद् दृ[1]ष्टान्तरो(२)क्तेभ्यो घटं दृष्टान्तमब्रवीत्।
[2] तथा मानेष्ववैयर्थ्यादन्तर्व्याप्ताव[3]पीष्यताम्॥

इत्यन्तरश्लोकः॥

कथमिदानीमनुमेये सत्त्वमेव सपक्ष एव सत्त्वमसपक्षे चाऽसत्त्वमेव निश्चितमिति हेतोस्त्रैरूप्यमवगन्तव्यम्।

"मतौ सपक्षासपक्षौ साध्यधर्मयुतायुतौ।
सत्त्वासत्त्वे तत्र हेतोस्ते ग्राह्ये यत्र तत्र वा॥"

1 དཔེ་ལ་ཆགས་ཀྱི་རྨོངས་ལ་ = दृष्टान्तसक्तेभ्यो
2 དེ་བཞིན་དཔྱོད་ལ་དོན་མེད་ཡིན

# अन्तर्व्याप्तिसमर्थनम्।

~~साध्यधर्मयुक्तः सर्वः सामान्येन सपक्षः। अतद्युक्तश्चा-~~
ऽसपक्ष इति। तस्मिन् सपक्ष एव सत्त्वमसपक्षे चाऽ-
सत्त्वमेव यथाक्रममन्वय-व्यतिरेकौ तौ पुनर्यत्र तत्र
वा धर्मिणि गृहीतव्यौ यत्र शक्यौ गृहीतुम्।

[113] 卐 तदिह सत्त्वस्य सर्वतोऽक्षणिकाद् बाधकप्रमाणबलाद्
व्यावृत्तौ सिद्धायां यत् सत्तत् क्षणिकमित्यन्वयः साध्यधर्मि-
(ण्ये) ण्यवगृह्यते। तत्र दृष्टस्य हेतोर्व्याप्तिग्रहणाद् धर्मा-(धर्म्य-)
न्तरासम्भवात् सम्भवेऽपि तदनु सत्त्वात्। यद्येव-
मसाधारणो नाम कथमनैकान्तिकः। यदुक्तम्

असाधारणतां हेतो
अब्रवीदग्रहाद् व्याप्ति
<उक्तमेतज्जडधियो ध
पलाः तदभिमान
श्रावणत्वं दृष्टान्ताभ
रनिष्टेरगृहीताया
त्वात् अथवा
मानोपकल्पित

卐 अहीं पानुं फाटी गयुं छे. पृ.११४मां
(पृ.११४ पण अहीं फाटी गयुं छे) आ ग्रंथनी समाप्ति थाय छे.

दाधिक

दृष्टशब्द

न्यवत

सत्त्व

२

[११५] साध्यप्रतीतेः साधनवै-

फल्यं तैव व्याप्तिर्गृहीतया

तया स्यादनैकान्तिकत्वं

णे यथोक्तन्यायेन साधन-

वादि साधनमेवेति वेदि

जनापेक्षयाऽसाधारणमनै

मपि यदि हि मूढ-

णत्वमदुष्टो हेतुः

शब्दान्तरं स्यात्।

प्रमाणं प्रवर्त

तीति कथम-

# PREFACE

[1] The six philosophical tracts of the Buddhists in Sanskrit included in this publication are – (1) अपोहसिद्धि, (2) क्षणभङ्गसिद्धि, By direct method, (3) क्षणभङ्गसिद्धि By indirect method, – all [redacted] by रत्नकीर्ति (4) अवयविनिराकरण, (5) सामान्यदूषणदिक्प्रसारिता, both by पण्डिताशोक; and (6) Antarvyapti-Samarthan by Ratnakar Sānti. All these works are written in the philosophical language of the best piriod. It is a relief to read a book written in this style, after the diffuse and verbose works of early Sanskrit (Buddhist) literature. It is also a relief to read a book of this style, after the enigmatic and algebraical Style of the modern Naiyāikas. these will not loose by camparision with the best philosophical works of Bhahmanas. They are short works and deal each with one topic only.

The first, अपोहसिद्धि, deals with the imports of the words. The theory it propounds is that a word denotes something Positive, and at the same time differentiates it from all others. The two acts, one positive and the other negative, are simultaneous. It is not a positive action followed by negation, nor is it a negative act followed by assertion.

In establishing this, the author refutes successively the theories of (1) कुमारिल, (2) त्रिलोचन, (3) न्यायभूषण, (4) वाचस्पति मिश्र, and
[2] (5) धर्मोत्तर. This gives us some clue to his date. Kumaril preceded Sankaracarya by two generations, and Sankar's date is fixed at about 800 A.D. Aufrecht mentions several Trilocanas. None of them appear to go beyond the Mahmaden

Congest. पण्डितविन्ध्येश्वरीप्रसाद दुबे, Librarian
of the Benares Sanskrit college, says that
Trilocan ~~of~~ was the teacher of वाचस्पतिमिश्र,
for Udayan in commenting on that authors
न्यायवार्तिकतात्पर्यटीका says — " अतिजरतीनामिति
उद्योतकरसम्प्रदायो ह्यमूषां यौवनम् । तच्च कालपरिपा-
कवशाद् गलितमिव किं नामात्र त्रिलोचनगुरोः
सकाशादुपदेशरसायनमासादितममूषां पुनर्नवीभावाय
दीयत इति युज्यते । Trilocan is here said to
be the guru of वाचस्पति. But there is another
more explicit quotation. Vardhaman in
commenting on the above work of वाचस्पति
says, " सम्प्रदीयत इति सम्प्रदायो रहस्योपदेशः ।
त्रिलोचनः टीकाकृतो विद्यागुरुः । This is the
Trilocan mentioned mentioned here. Many
Nyayabhusanas are known: one is a
commentary on ~~the~~ Bhasarvagna's Nyaya-
sara, and the other Mimansa work mention-
ed in page 6 of Bhandarkara's report for

the year 1883-84. A third work Kanada' Nyayabhusan, has recently been found in the collection of MSS. presented By Maharaja Candra Samsher Jang Bahadur Rana prince minister and Commandar-in-chief of Nepar, to the Bodlian Library, Oxford. But none of these are applicable here. A fourth Nyayabhusan, a vritti on the Nyayasutras, is mentioned in pages 341, 351 and 353 of the Tarkikaraksa and at the commencement of the Dravyakiranavali, Both printed at Benares. This seems to be the Nyayabhusana meant here Vacaspati's date is Saka
[3] 898 (See the appendix, to Nyayavartik Bibl. Ind.) Dharmottar, whose commentary on Nyaya-Bindu has been published By Dr. Peterson in the

Bibl. Ind. has been placed by Satishacandra at about 847 A.D. from Tibetan Sources. The author of Apohasiddhi is very bitter against Dharmottar, and he takes a good deal of pains in elaborately refuting the theory of Vacaspati Misra. We can, therefore, safely place the author by the end of the tent century. It is a significant fact that he does not quote or refute Udayana, whose date is Saka 905-983 A.D. (See preface to Jadunatha Sarvabhauma's edition of Atmatattva-Viveka) This will make Ratnakirti a younger contemporary of Vacaspati Misra.

In the two parts of क्षणभङ्गसिद्धि, Ratnakirti attempts to establish by direct and indirect method the theory of the momentariness of the world,

that is, as soon as a thing is produced, it prishes and never and never lasts to the second moment. This is opposed to the theory of the Naiyakkas who consider all knowledge to be momentary, but the word momentary with them includes three moments – production duratoion, and dissolution. In the course of establishing this theory Ratnakirti refutes Sankar, Trilocan, Nyayabhusana, and Vacaspati. He sums up the arguments of his opponents and of his supporters in the following two verses. (See Page 76 and 77) –

तदयं पूर्वपक्षसंक्षेपः—

नित्यं नास्ति न वा प्रतीतिविषयस्तेनाश्रयासिद्धता

~~हेतोः स्वानुभवस्य च व्यतिरेकः सिद्धः सपक्षोऽपि च।~~

[4] शून्यश्च द्वितयेन सिध्यति न वा सत्तापि सत्ता यथा

नो नित्येन विरोधसिद्धिरसता शक्या क्रमादेरपि॥ इति।

अत्र सिद्धान्तसंक्षेपः —

धर्मस्य कस्यचिदवस्तुनि मानसिद्धा

बाधाविधिव्यवहृतिः किमिहास्ति नो वा।

काप्यस्ति चेत् कथमियन्ति न दूषणानि

नास्त्येव चेत् स्ववचनप्रतिषेधसिद्धिः॥ इति।

Ratnakirti not only wrote the Apohasiddhi and the two treatises of Ksana-bhangasiddhi, but he mentions two more works by himself, namely — (1) Sthirasiddhidusana. (Page 68) and (2) चित्राद्वैतसिद्धि (page 71).

The fourth treatise in this Volume is अवयविनिराकरण. In the Nyayasastra the theory on the subject is, that the whole, i.e. अवयवी, has an existence

independant of parts, i.e. अवयव, and the relation between the part and the whole is an eternal relation which they call Samavaya. Pandit Asoka takes this stand against this theory and says that the whole is nothing but a collection of parts and has no separate existence whatsoever. And if it has no indipendent existence the eternal relation is only a myth. He says - परमाणव एव हि पररूपदेशपरिहारेण उत्पन्नाः परस्परसहिता अवमासमाना देशवितानवन्तो भासन्ते। विततदेशत्वं च स्थूलत्वम्।

The atoms are produced by avoiding other space and other form, that is, an atom ocupies its own space and has its own form. But when a combinatian of atoms becomes an object of knowledge

they appear to occupy an extension of space and occuping an extension of space means bulk.

[5] Pandit Asoka quotes Kamadasisyas and Dharmottar. He comes, therefore, after the middle of the 9th century.

The fifth work, सामान्यदूषणदिक्प्रसारिता, by the same author, refutes the Naiyayika theory of Samanya or genrality as a singular, all-prevaiding and eternal category of knowledge. He sums up his theory in the following words—

एतासु पञ्चस्ववभासिनीषु प्रत्यक्षबोधे स्फुटमङ्गुलीषु।
साधारणं षष्ठमपेक्षते यः शृङ्गं शिरस्यात्मन ईक्षते सः॥

These are fingers which are distinctively perceived. The sixth common is not perceived. He who sees a sixth certainly sees a horn on his head.

Further. प्रत्यक्षप्रतिभासिधर्मसु न पञ्चस्वङ्गुलीषु स्थितं
सामान्यं प्रतिभासते न च विकल्पाकारबुद्धौ तथा।
ता एव स्फुरन्मूर्तयोऽत्र हि विभासन्ते न जातिस्ततः।
सादृश्यभ्रमकारणौ पुनरिमावेकोपलब्धिध्वनी ॥

Generality is not preceived in the five fingers, the attributes of which are perceived by the senses, nor is it perceived in the form of a phenomenon. What is perceived are the fingers in their distinct shapes, generality is not perceived. The perception and coception of one are simply the causes of error begotten by resemblance. In this work Pandit Asoka quotes Udyotakar.

The sixth is अन्तर्व्याप्तिसमर्थन By रत्नाकरशान्ति. The argument by which

[6] the existence of fire, is proved in the mountain, when put in syllogistic form, runs thus -

पर्वतो वह्निमान्, धूमात्, यो यो धूमवान् स वह्निमान् यथा महानसम्, वह्निव्याप्यधूमवानयम्, तस्माद् वह्निमान् ।

In this case the invariable relation of the smoke ~~and~~ to fire, that is, व्याप्ति is established from the example given, namely the kitchen. From thence it is transferred to the mountain, which proves the existence of fire in the mountain.

But in the case of proving momentariness ~~of~~ of all things you do not get an example, and also the invariable relation between the thing which is to be proved and the thing by which it is to be proved cannot

be established outside. This is a difficulty which the author has to face and he faces it by declaring that such a relation need not be proved outside in all cases of inference.

There is another difficulty. In the case of fire there is the mountain in which the invariable relation between ~~the~~ smoke and fire is to be proved. But in the case of momentariness there is no such thing as the mountain in which that invariable relation between momentariness and the world is to be proved. This difficulty the author faces by saying that intelligent persons can conceive that invariable relation anywhere.

He practically says that if the invariable relation between the thing to be proved and the thing by which it is to be proved is once conceived, it can
[7] be proved anywhere. No mountain and no kitchen is necessary. This he calls अन्तर्व्याप्तिसमर्थनम्, that is the establishment of the theory that it is possible to prove the invariable relation "within", that is between the thing to be proved and the thing by which it is to be proved.

From Tibetan sources Dr. Satis Candra says that Ratnaka-Santi the author of this work which has a Tibetan translation, flourished at विक्रमशिला about the end of the tenth century.

The manuscripts from which the works have been edited are described bellow:

(1) अपोहसिद्धि

a. The manuscript belonging to the Government collection of the Asiatic Society of Bengal. The right hand ends of the leaves of this manuscript have greatly corroded five or six letters being lost in each line by corroision.

b. A manuscript belongin to myself

Both These manuscripts are written in the Bengali hand of the 12th century, and they are both correct.

The edition is based on A.

(2-3) क्षणभङ्गसिद्धि

The same two manuscripts as before.

The edition is based on B.

(4-5) अवयविनिराकरण and सामान्यदूषणदिक्प्रसारिता.

One manuscript belonging to me

correctly in the 12th century Bengali hand

(6) अन्तव्याप्तिसमर्थनम्

From a copy made under my supervision
[8] by,, Pandit Asutosa Tarkatirth of No III
364 B in the Durbar Library.

In 1902 it was proposed that the first three works for which MSS (a) existed, should be edited by me with the help of certain Oriental scholars in Europe - Dr. Poussin of Ghent, Mr. Thomas of the India office and Professor Th. de. Scherbatski-Karparka of St. Petersburg, who would help me from Tibetan and Chinise translations. Photagrafs were prepared at the cost of the Asiatic Saciety Bengal and sent to these distinguished scholars But it was found that no Tibetan or Chinise translations existed, and

but for the fortunate accident of a friend of mine presenting precious manuscripts to me, the work could not have been undertaken.

I have to offer my heartly thanks to Dr. Poussin for his invaluable advice and suggestions constantly made in the early part of this edition.

सं. २००७. ज्येष्ठवदि ३ शुक्रवार        मु. मालेगांव (जिल्हा-नाशिक)

આ ટિબેટન શબ્દોના સંસ્કૃત પર્યાયો પ્રી દિગ્નાગ બુદ્ધિસ્ટ ટેક્સ્ટ નામના ગ્રંથમાંથી લીધા છે ।

རྒྱ་གར་སྐད་དུ། ...
བོད་སྐད་དུ། ཚོར་བ་ ... བསྒྲུབ་པའི་འགྲེལ་པ་
ཕལ་ཆེ་ དངོས་པོ་ ཐམས་ཅད་ ...

Extracts from Pre-Dignaga Buddhist texts on logic. G.O.S. XLIX. From P. 26 to 32.

ཚོར་བ = वेदना.
འདུ་ཤེས = संज्ञा.
སེམས་པ = चेतना.
རེག་པ = स्पर्श.
ཡིད་ལ་བྱེད་པ = मनस्कार (मनसिकार)
འདུན་པ = छन्द
མོས་པ = अधिमुक्ति
བརྩོན་འགྲུས वीर्य
ཏིང་ངེ་འཛིན = समाधि
བཏང་སྙོམས = उपेक्षा.
སྦྱོར་བ = योग प्रयोग
ཡང་དག་པར་སྦྱོར་བ = संयोग (संप्रयोग)
ཐོབ་པ = प्राप्ति
ལྷག་པའི་བསམ་པ = अध्याशय
ཁོང་ཁྲོ་མེད་པ = अप्रतिघ

འབད་པ = प्रयत्न
རྩོལ་བ = व्यायाम
མ་རྨོངས་པ = अमोह.
སྤྲོས་པ = औत्सुक्य
གནོད་པ་མེད = अविघात (अव्याबाध) अनपकार (अव्यावर्त्य)
འབྱོར་ངང་ལྡན = ~~[illegible]~~ वशिता
ཁོང་ཁྲོ = प्रतिघ
ཡིད་ལ་འགྱོད་པ་མེད་པ = अविप्रतीसार
~~[illegible]~~ འཛིན་པ = ग्राह
མི་འཛིན་པ = अग्राह.
དྲན་པ = स्मृति
བརྟན་པ = स्थिर. धीर.
ལྷག་པར་ཞེན་པ = अध्यवसित

རྨོངས་པ་མེད་པ = अमोह | ཞེ་ས गौरव

མི་རྩོལ་བ = अव्यायाम | རི་མོར་བྱེད་པ = मानना.

སྨོང་མེད་པ = अनौत्सुक्य | དད་པ = श्रद्धा = भक्ति

དོན་དུ་གཉེར = अर्थिन् or आर्थिक | བསྒོམ་པ་བཞིན་བྱེད་པ = अनुविधान

སྨོན་ལམ = प्रणिधि | གུས་པ = आदर

རྒྱགས་པ = मद | རྩོད་པ = वाद

~~[illegible]~~ མི་ལྡན་པ = ~~निर्विषय~~ अविषय (विप्रयोग) | ཤིན་དུ་སྦྱངས་པ = प्रश्रब्धि

ངེས་པར་འབྱིན་པ་མ་ཡིན = अनैर्याणिक | ངག = वाक्य

སྐྱེ་བ = ~~उत्पत्ति~~ जाति, उत्पाद | མགུལ་པ = कण्ठ

དགའ་བ་དང་ལྡན = सप्रीति | འཁྲུག་པ = क्रोध

ཡོངས་སུ་གདུང་བ = परिताप | ཐེ་ཚོམ = विचिकित्सा.

མི་དགའ་བ = अप्रीति | སྡོམ་པ་ཡོངས་སུ་དཔག་པ = संवर परिमाण.

རྟོག་པ = वितर्क.

སྡུག་པ = इष्ट | ནང་ལེགས་པར་དད་པ One who has faith within himself

དད་པ प्रसाद

འདོད་པ་མི་མཐུན་པ = इच्छाप्रतिलोम, प्रतिकूल | ཕྱོགས་གཅིག = एकदेश

མཐུན་པར་འཛིན = संग्रह | ངོ་ཚ་ཤེས་པ = ह्री.

རྗེས་སུ་མཐུན་པར་མ་གྱུར་པ = असमनुग्रह | དྲང་པོ = आर्जव

མི་འཇིགས་པ = विशारद | མི་འདྲིད་པ = No deception. अवंचना

Qoted from Pre-Dignag Buddhist ~~Logic~~ texts on Logic (G.O.S. XLIX) Pg. 61-82.

Indices

~~ཐུན་མོང་མ་ཡིན་པ- असाधारण ཐུན་མོང་= साधारण~~

མི་མཐུན་པ= असाधारण

མི་འཇུག་པ= अप्रवृत्ति

ལྡོག་པ་མེད་པ= अव्यावृत्त अव्यतिरेक

ཁྱབ་པ་མེད་པ= अव्यापिन्. अव्याप्ति

མི་སྲིད་ असम्भव

ཐག་རིང་པོ་མ་ཡིན་པ अनतिदूरत्ता. अतिसंनिकर्ष

བཟང་པོ་མ་ཡིན = अयुक्त

མི་འཐད - अयुक्त

མི་རུང = अयुक्त

ཡང་དག་པ་མ་ཡིན་པ= अभूत= असत्

འབྲས་བུ= कार्यसम

གཞན་གྱི་དོན་ཉིད- पारार्थ्य

བྱེད་པ་པོའི་རྒྱུ= कारकहेतु

ཡོད་པ་ཀུན་གྱིས་བྱས་པ= सत्प्रत्ययकर्तृत्व।

དཔེ་ལྟར་སྣང་བ= दृष्टान्ताभास

རྟགས་ལྟར་སྣང = हेत्वाभास लिंगाभास

གཏན་ཚིགས་ལྟར་སྣང་བ= हेत्वाभास

ཕྱོགས་ལྟར་སྣང་བ= पक्षाभास

~~ལེགས་པར་ངེས་བྱུང = सुविचारित  རྗེས་སུ་འགྲོ་བ = अन्वेषण~~

ཕྱོགས = प्रतिज्ञा, पक्ष  ཐལ་བ = प्रसङ्ग

རྫས = द्रव्य सत्  ཁས་བླངས = अभ्युपगम

ཕྱོགས་ཀྱི་ཆོས = पक्षधर्म  འབྲས་བུ = कार्य

ཕྱོགས་བརྗོད་པ = पक्षवचन  བྱས = कृतक

དམ་བཅའ་དང་འགལ་བ = प्रतिज्ञाविरोध, प्रतिज्ञाविरुद्ध

ངེས་པར་གཟུང་བ = निर्धारण, अवधारण

ངེས་པར་བཟུང་བ = ॥ ॥

ཤེས་པར་འདོད་པ = जिज्ञासा  ཉམས་སུ་མྱོང = अनुभव

ཕྱོགས་ཀྱི་ཆོས་ཉིད = पक्षधर्मता

གཉེན་པོའི་ཕྱོགས = प्रतिपक्ष  བརྗོད་པ = उपदिश्यमान

ཀ = क्लेश  བསལ་བ = निराकृत

བྱེ་བྲག = विशेष

ཁྱད་པར་དུ་བྱས་པ = विशिष्टता N.P (न्या.प्र)

རྟག་པར་མཚུངས = नित्यसम

དཔེ་བརྗོད་པ = उदाहरण, दृष्टान्त

ངེས་པ = एव

སེམས་དཔའ་ཅན = चेतन

རྣམ་རིག = संविति  བརྗོད་པ = उपदिश्यमान

མི་སྐྱེས་པ་ = ~~[struck]~~ अनुत्पत्ति[सम]

མི་བརྗོད་པ་ = अनुक्ति[सम]

མ་རྟོགས་པའི་དོན་ = अप्रतीत

(साध्यत्वेन इष्ट:)

བསྒྲུབ་པར་བྱ་བར་འདོད་པ་ = साधयितुम् इष्ट:

བརྗོད་པར་ = उद्भावन

ཆོས་ ~~[struck]~~ ངན་པ་སྨྲ་བ་ = अपवादवाद

ཉིད་ལ་ = एव

མི་འཁྲུལ་བ་ = अव्यभिचार, अव्यभिचारिन् ।

ངེས་པ་ = निश्चय

ཞིག་ནས་མེད་པ་ = प्रध्वंसाभाव

འགལ་བ་འཁྲུལ་བ་མེད་པ་ཅན་ = विरुद्धाव्यभिचारिन्

འགལ་བ་མིན་འཁྲུལ་བ་ = "

" " ལ " " = "

ཆོས་ཀྱི་རང་བཞིན་ཕྱིན་ཅི་ལོག་ཏུ་སྒྲུབ་པར་བྱེད་པ་ = धर्मस्वरूपविपरीतसाधन

" " ཁྱད་པར་ " " " = धर्मविशेषविपरीतसाधन

རྗེས་སུ་ ~~[struck]~~ འགྲོ་བ་ = अनन्वय

འབྲས་བུ་མེད་པ་ = वैफल्य

བྱེ་བྲག་མེད་པ་ = अविशेष  བྱེ་བྲག་མེད་ = अविशेष

ཁྱད་པར་མེད་ = अविशेष

དགོས་པ་མེད་ = अनर्थक

नमः श्रीअन्तरिक्षपार्श्वनाथाय

# विग्रहव्यावर्तनी-वृत्ति पाठान्तराणि.

## G.O.S. XLIX

| | S. | T. |
|---|---|---|
| (१) | ~~यत्र सर्वत्र~~ | ~~V.T. omits.~~ |
| | संज्ञेति (संज्ञेऽपि) | |
| | यद्ये(यदि)तच्छून्याः | གང་ཡིན་པའི |
| | यत्नेवोभयसामग्र्यामस्ति। हेतुप्रत्यय- | རྒྱུད་པ་རྣམས་ལ་ཡང་མེད། |
| | सामग्रीविनिर्मुक्तं | བཏེ་པ་ཚོགས་པ་ལ་བཏོགས་པ་= |
| | | यत्नेऽपि नास्ति। उभयसामग्रीविनिर्मुक्तं |
| | तस्मान्निःस्वभावं | तस्मादिदं निःस्वभावं<br>འདི་རང་བཞིན་མེད་པ་ཡིན་ཏེ· |
| | यस्मान्निःस्वभावं | V.T. Omits. |
| (२) | किं कारणं | V.T. Omits. |
| | श्रुत्वा | पूर्वा [illegible] |

~~कुशलानां धर्माणां धर्मावस्थाविदश्च मन्यन्ते~~ ।
कुशलं जनस्वभावं शेषेष्वप्येष विनियोगः॥

इह धर्मावस्थाविदो मन्यन्ते कुशलानां धर्माणामेकोन-
विंशं शतम्। तद्यथा एकदेशो विज्ञानस्य वेदनायाः
संज्ञायाः चेतनायाः स्पर्शस्य मनसिकारस्य छन्दस्य अधि-
मोक्षस्य वीर्यस्य स्मृतेः समाधेः प्रज्ञायाः उपेक्षायाः
प्रयोगस्य संप्रयोगस्य ~~विप्रयोगस्य~~ प्राप्तेः अध्याशयस्य
प्रतिविरतिः व्यवसाया(?) औत्सुक्यस्य उन्मु(ढ)उ-
त्साहस्य अव्यवर्त्यस्य वशितायाः प्रतिपत्तेरविप्रतीसारस्य
धृतेरध्यवसायस्य अनौत्सुक्यस्य अनुमूर्ध्य(ढ्य)नुसारस्य
प्रापणायाः प्रणिधेः मदस्य विषयाणां विप्रयोगस्य अनित्या-
(नैर्या)णिकतायाः उत्पादस्य स्थितेरनित्यतायाः समधिगतायाः
जरायाः परित्रा[स]रतेः । वितर्काणां ~~प्रीति~~ प्रीतेः प्रमादस्य
अप्रश्रब्धस्य व्यवहारतायाः प्रेष्प्रतिकूलस्य प्रदक्षिणग्राहस्य
वैशारद्यगौरवस्य चित्रीकारस्य भक्तेरभक्तेः शुश्रूषायाः आदर-
स्य अनादरस्य प्रस्रब्धेः ह्रासस्य वाचः विस्पन्दनायाः
सिद्धस्य अप्रमादस्य अप्रस्रब्धेः व्यवहारतायाः दाक्ष्यस्य
सौरत्यस्य विप्रतिसारस्य शोकस्य। उपायासायासमी(तस्य)
अप्रदक्षिणग्राहस्य संशयस्य संवराणां ~~परिशुद्धे~~रध्याशयस्य

~~स्पस्येति। श्रद्धा ह्रीरार्जवमवचनम्। उपशम: अचापलं~~

सप्रमादमार्दवं प्रतिसंख्यानं निर्वैरपरिदाह: अमद: अलोभ अरोष

(अद्वेष:) अमोह(:) असद्वत् अप्रतिनि:सर्ग: विभव: अपत्रप्या

~~अ परिअच्छादनं मानन~~ ~~कारुण्यं~~ मैत्री अदीनतादिरतम: ... नं

नाह: अली चेतसो ~~पत्या~~ दानं आन्ति: व्यवसदु आसौरत्य

मिति भागान्वयं पुण्यं असंज्ञी समापत्ति: नैर्याणिकता

असर्वज्ञताऽसंस्कृता धर्मा: इति एकोनत्रिंशं शतं कुशलानां

कुशल: स्वभाव:।

तथाऽकुशलानामकुशल: स्वभाव: निवृताव्याकृत: प्रकृता-

व्याकृत:। कामोक्तानां कामोक्त:। रूपोक्तानां रूपोक्त:।

आरूप्योक्तानामारूप्योक्त:। अनाश्रवाणामनाश्रव:। दु:खोक्तानां

दु:खोक्त:। समुदयोक्तानां समुदयोक्त:। निरोधोक्तानां निरोधोक्त:।

मार्गोक्तानां मार्गोक्त:। भावनाप्रहातव्यानां भावनाप्रहातव्य:।

अप्रहातव्यानां अप्रहातव्य:। प्रहातव्यानां प्रहातव्य:।

यस्मादेवमनेकप्रकारो धर्मस्वभावो दृष्ट: तस्मादिह

यदुक्तं नि:स्वभावा: सर्वभावा: नि:स्वभावत्वात् शून्या इति

तन्न।

